M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 127

Title: Siddhanta Samgraha

127

Siddhānta-Saṃgraha	Title
Vyāsa, son of Simha	Author
	Editor
Sam. 1766	Year, Vols.
	Publisher
	Remarks

127

...नद्रेशानववैरिण। गिरिजाप्राप्त्यर्हं हरस्याद्भुते देवेषं जग
...के स्मरहराभावेसमुन्नति।। आवास्थितिं ममबरः
...शाकल्लानागाधिपः क्ष्मा...सर्वे...कामधीश्वर संमगामल
...मांचनिक्षाटनं।।३।। गुरुं हं कृतनुं कल्पवादीनां दिव्यवाद
कान्त।।२।। स्मसानेजायते ... ककण्ठप्रोपसेवितः ...
...नुगहीनेस्पद्रुजनः कि करिष्यति।। अनन्तलोपतितो वह्नि
...पेनाप शाम्यति। क्ष्माबल शक्तो नां ...नां भक्षताः
...

अधीत्वतर्कं

केलि

सि॰सं॰ ॥ १ ॥ श्रीसिद्धेश्वरी जयति राम ॥ नमो मारमतौ नत्वा गंगां देवीं सरस्वतीं । गतोऽहं रामकृष्णं च सा धपाभिचि
कीर्षिं ॥१॥ व्याप्य धीसंपन्ने रामकृष्णा ज्ञा गुरोः ॥ कणादगौतममतपा कुर्वे सिद्धान्तसंग्रहं ॥२॥ कुशा
बुद्धिर्निपुणोऽत्र यो न्यो न मत्सरी नाधि च मंदबुद्धिः ॥ कृपोऽयं रसिकोऽत्र प्रवीणाः कामी गुणी मदनेपु स
कोत्र ॥३॥ अपारपाथोधि समान शास्त्रे तत्र प्रवेशोऽस्ति तरां दुरूहः ॥ तथापि मंदूपपद्यं वः सति
रो कौमेतां वसमुद्र ... ॥४॥ कृतांजलिः सन्नविनयं विधाय प्रविज्ञप्तिमेकां विदुषां करोमि । विलोक्य म
मकुप्रबंदं तु दोषदृष्टिभावेनादरेण नकोपि दोषः ॥५॥ दोषबुद्धिर्न कर्तव्या नवे सिद्धान्तसंग्रहे ॥ संदे
हो रेतन्नसंदेहो निरिवत्रै वंद्यते हि सः ॥६॥ मंगलस्य कारणता तानानाचर्यमस्ति कृत ग्रंथस्य गमस्ता सं यतिरे
त्रिमंगलं वि कुर्यात्चिसमाहप्य भावेऽसंभावात् । विना पि मंगलं नास्ति कानुषितत्वं वेनिर्विघ्न समा ।
दर्शनादिति चेन्न ॥ मंगलं सफलं अलौकिकाविगीतशिष्टाचार विषयत्वात् दर्शवदिति अनुमानेन
मंगलस्य सफलत्वे सिद्धे फलजिज्ञासायां विघ्नजिज्ञासायां पेन स्वर्गफलकल्पने गौरवात् उपस्थितत्वात् ॥ १ ॥

फलं१

कं४

व७

फलं८

तत्समाप्तिरूपं फलं कल्प्यते । शिष्टं तु वेदप्रामाण्येन स्तुपगमात् संभावितत्वाचार विषयत्वं ॥ यत्र सति मंगले
न समाप्तिस्तत्र विघ्नबाहुल्यं बोध्यं ॥ बहुतरविघ्नानां बहुतर मंगलनाश्यत्वनियमात् ॥ नहि घनं तूलमुदकमेकं
वो रामं बोधनिवारयतीति निरूपणात् ॥ तद्धन जलनिवारणकारणता किं न भवति अपि तु भवत्येव प्रचितत्वात् नां प्रबलजलनिवारणे
रत्न होत ॥ तथा प्रचितमंगलानां प्रचितविघ्ननाशकत्वाभ्युपगमात् ॥ प्रमत्तानुष्ठितत्वे च जन्मांतरीय मंगलस्य सत्त्वा
न्न व्यभिचारः ॥ उत्तस्यमानाविघ्नस्य जे मंगले न विघ्न प्रागभाव परिपालनमात्रं क्रियते ॥ स्य भेव योग से प्रस्ताचारस्त
परि रतानाभलप्रलंभोपोगः स्य ध्वंस्यौपालनं क्षेमः मंगलस्य समाप्तिजनने विघ्नध्वंसो व्यापारः ॥ नन्वयं विघ्न संदेहे क
मंगले प्रवृत्तिरिति वाच्यं । संदेहे पि तदा चरणस्यौचित्यात् ॥ अत एव शंकित नाशिष्ट निवारणार्थं प्रवर्तते परीक्षकाः इ
ति ॥ अन्यथानुपस्थिते परिपंथिनि तिः पार्थिवेष्वपि दूरतः स्वपते योगनापि दृष्टिः इति ॥ परे तु विघ्नध्वंस एव मंगलजन्यं फलं स्वतःसिद्ध
गी त्वः विघ्नसंसर्गाभावे सति बुद्धिप्रतिभादिकारणसमुदायेन समाप्तिर्जन्यते ॥ नन्वेवं विघ्नविरहस्य जन्मांतरीयमंगलेन निःफलं
उके मिति वाच्यं ॥ तत्र पुत्रपासनिरूपफलांतर कल्पनात् ॥ अत एव पितरं मुद्दिश्य कृतगया श्राद्धेन पुत्रानिष्पफलोत्पत्ति कल्पन
मिति संक्षेपः ॥ अत्र रणारहितमतिन्यायेन विघ्नध्वंस विशेषफलावच्छिन्नं प्रति मंगलस्य कारणत्वं विघ्नध्वंसं विप्रो

लि॰ सै॰ ।।
।। २ ।।

तरकृत्वछिन्नप्रतियोगिताकसमवायाद्देः कारणतावच्छेदकत्वमिति न व्यभिचार इति ।। अथ धर्मार्थकाममोक्षेषु चतुर्षु पुरुषा
र्थेषु मोक्षस्य परमोत्तमपुरुषार्थः स चात्मतत्त्वज्ञानाधीनस्तत्त्वज्ञानं पदार्थविवेकाधीनमिति पदार्थानिरूपणं
मो ।। तत्र द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्याः [redacted] सप्तैव ।। अत्र सप्तपदार्थत्वं स्पष्टत्वं । एवकार
स्तु शक्तिसादृश्यादीनामपि पदार्थान्तरत्वव्यवच्छेदार्थः ।। ननु शक्तिसादृश्ययोरतिरिक्तपदार्थत्वं भविष्यतीति क
थमतिरिक्तत्वव्यवच्छेदार्थः ।। तथा हि मणितापाद्यभावविशिष्टवह्निना दाहो जन्यते मणिसत्त्वे न दाहो नोत्पद्यत इति
त्रि दाहजनकत्वं वह्नेर्निष्पाद्य मणिना नाधिपतिमणितो विरहेऽपि न तत्सत्ता दाहस्तु शक्तिविनाशाज्जनी वह्नेर्दाहकातिरिक्ता
शक्तिः स्वीकर्तव्या इति । सा च पदार्थान्तरमिति चेन्न सा दहनमपि पदार्थान्तरत्वं तत्र न भावे तत्र वर्तिकेऽवलम्ब्यापि निस
त्त्वे सति अभावेऽपि दाहमिति वाच्यं पदाभावः प्रतियोगिविरोधी तत्पदाभावोऽपि नापैनाभावेन वर्तते ।। भावेऽनप्रती
बन्धान्न दाहादिति वाच्यं ।। मणितापाद्यभावविशिष्टवह्नेः केवलं वह्नेर्मणितापाभावस्य च उत्तेजकाभावविशिष्टमणितापाभावस्य
दाहं प्रति कारणत्वे कल्पनेऽस्य सन्तताप्रतिबद्धप्रागभावध्वंसकल्पना गौरवं स्यात् ।। उत्तेजकत्वं प्रतिबंधकप्रतिबंधकत्वे
प्र प्रतिबंधकत्वे च कारणतायां तत्ताभावप्रतियोगित्वं ।। अत्र दाहं प्रति बंधकस्य मणेः प्रतिबंधकमंत्रमहौषधिसत्त्वे मणि

सत्त्वेऽपि दाहो भवतीति विशिष्टान्तं ।। न चोत्तेजकाभावविशिष्टमणितापाभावस्य कारणत्वे गौरवमिति वाच्यं ।। उत्तेजकत्वे
विशिष्टहस्त्ये प्रथमपक्षे प्यावश्यकत्वात् ।। तथा हि ।। मणितापाभावविशिष्टवह्नेः कारणत्वपक्षे विनिगमनावि
रहात् ।। मणितापाभावविशिष्टवह्नित्वं वह्निविशिष्टमणितापाभावत्वं च कारणतावच्छेदकं वाच्यं ।। अन्त्यपक्षे च प तर२
क्षे पाति त्रि पुरि विनिगमना ।। पुरि त्वस्या बाधकबाधकप्रमाणोपन्यासः ।। तत्र अपि उत्तेजकाभावविशिष्टोपोम
णिः तदभावः विशिष्टवह्निः कारणमिति भवत्येव एवं वह्निविशिष्टोत्तेजकाभावविशिष्टोपो मणितापाभावः स्तप
कारणमिति महद्गौरवं ।। अन्यथा उत्तेजकाविशिष्टमणितापसत्त्वे वह्निसत्त्वे च वह्निविशिष्टमणितापाभावस्याभावात्
तथोत्तेजकसत्त्वे मणितापसत्त्वे च मणितापाभावविशिष्टवह्नेरभावाद्दाहानुपपत्तिरिति संक्षेपः ।। एवं सादृश्यं न पदा
तथा हि च र्थान्तरं । कृत्तपदार्थघटितत्वात् सादृश्यं तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं कृत्तपदार्थान्तरगोऽमिति सप्तैव त
पदार्थाः ।। तत्र पदार्थत्वं ज्ञेयत्वमिति विषयत्वं । ते च पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसजनकं
इति अपपदार्थानां तत्त्वज्ञानेन सति कथं मोक्षो चेत् ।। दृष्टश्रुतास्तोऽपि पदार्था न विविच्य श्रुतिस्मृतीतिहासपुराणोप
दिष्टयोगविधिनाऽदृष्टकाजनैरं तपसेयितान्तर्यति नेश्वरात् दुर्म्मादेव नेत्रता न मुसद्धैते पतो प्रवर्ज्यतरहिते घ

॥सि॰स॰॥

(२)

स्र

पदार्थविवेचनं मननोपयोगि॥ मननं युक्तिभिरात्मचिंतनमिति क्रमेणैन मोक्षे पदार्थतत्त्वज्ञानोपयोगः॥ भूयात्मतत्त्व
ज्ञानं किं जीवात्मतत्त्वज्ञानं वा ब्रह्मात्मतत्त्वज्ञानं मोक्षे कारणमिति चेन्न॥ अत्र वदंति ब्रह्मात्मतत्त्वज्ञानं मोक्षे कार
णत्वेन व्याहि॥ वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्तादिति ब्रह्मात्मानं पुरुषसूक्ते पठति विदित्वा तम
सुमेति नान्यः पंथा विद्यतेऽयनायेति श्रुत्या ब्रह्मात्मसाक्षात्कार एव मुक्त्युपयोगीति प्रतिपादितं॥ तत्र जीवात्मसा
मल्लीभन्नत ५ क्षात्कारः संसार[illegible] नकारणानां प्रतिकारणं तच्च तमेव विदित्वेऽपव्यते विदिष्वे वेसर्पः॥ नेतात्मतत्त्वा
द्विषयस्य प्रत्यक्षं संभवति यथा श्रुतेः श्रुत्वात्मविषयकं प्रत्यक्षं नं भवते। न च न संभवति ज्ञानस्ति रिलूप
दार्थस्य स्वरूपतोऽभानासंभवाबदंतु निर्विकल्पकादिति तस्य जीवोऽयं तथा चेश्वरसाक्षात्कारे मनन
निदिध्यासनादिसंस्कृतं मनः कारणं मनसैवानुद्रष्टव्य इति श्रुतेः॥ पञ्चानां मननेरादि स्कृतिस्वसंस्कृ
तं मनोविषयेति॥ अथ परात्मनः परापोगयज्ञानजीवस्याविवेचनसंभवः॥ अन्यथा चैतस्यैव मात्रात्मप्र
त्यक्षं स्यादिति चेन्न॥ जीवात्मसाक्षात्कारे परात्मनः परापोगपृथ्वे विदिता त्मसाक्षात्कारे स्वपेचोपपाद
नात्॥ तथाहि॥ ईश्वरविषयकप्रत्यक्षं हि बाधितं प्रतियोगिता संबंधेन प्रत्यक्षज्ञानं सहकृतं मनस्येव कार

॥शुभ॥

ता तेस्मै॥ वस्तुतस्तु परमात्मसाक्षात्कारं प्रतिव्याप्तानावस्थितपरमात्मगतमननस्यैव कारणतेति तदुक्तं व्याना
वस्थितं तदुक्तेन मननसाधर्म्यं तिपंचयोगीति योगितायोगजधर्मप्रसादसंसेश्वरं परपंतीति निःकर्षः विवेचि
तं चेदं न केवलं प्रदीपे परं तु जीवात्मसाक्षात्कार एव मुक्तौ कारणं न वा रे पुत्राद्यपकोपमेपुत्रः प्रियो
भवत्यात्मनस्तु कामाय पुत्रः प्रियो भवति नीत्यादिश्रुतिमुपक्रम्यात्मा वा रे द्रष्टव्यः श्रोतव्यो मंतव्यो नि
मोक्षद दिध्यासितव्य इत्यादिश्रुत्या जीवात्मसाक्षात्कारस्य मुक्त्युपयोगित्वं प्रतिपादनात्॥ आत्मसाक्षा क्षा ५
त्कार एव मुक्तौ कारणं ब्रह्मात्मसाक्षात्कारस्तु वासनानाशं प्रतिकारणं॥ अत एव संहितं तत्त्वतो ज्ञा द ५
तेः स्वात्मसाक्षात्कारस्तु मुपक्रोतीति संगच्छते॥ एतदुक्तं प्रसंसे दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञाना
नामुत्तरोत्तरापाये तदनंतरापायादपवर्गः॥ अपवर्गः तत्त्वज्ञानेनजातेन मिथ्याज्ञाननाशः मिथ्याज्ञान
नाशे रागद्वेषादिदोषनाशः दोषनाशे प्रवृत्तिनाशः प्रवृत्तिनाशे जन्मनाशः जन्मनाशे दुःखनाशः दुःख
नाश एव मोक्षः॥ अत्र च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनं यद्दुःखं तस्य ध्वंसो मोक्षः॥
आधुनिकदुःखध्वंसेऽतिव्याप्तिवारणाय दुःखप्रागभावासमानकालीनेति॥ दुःखविशेषणं तेन तदु

॥श्री॥
॥श्री॥

खध्वंसविशेषणीतेन चरमदुःखप्रागभावासमानकालीनो यो दुःखध्वंसे नातिप्रसंगः ॥ पूर्वोक्तदुःखस्य स्वतु
चरमदुःखप्रागभावासमानकालीनत्वात् ॥ मुक्तमुक्ताव्याप्तिवारणाय स्वसमानाधिकरणेति ॥ स्वदुः
खध्वंसः चरमदुःखं वा मुक्तदुःखध्वंसस्य चरमदुःखस्य वास्मदीयदुःखप्रागभावसमानकाली
नत्वेपि स्वसमानाधिकरणमुक्तदुःखप्रागभावासमानकालीनत्वान्न दोषः स्वसमानाधिकरणदुः
मुक्ते १ खासमानकालीनदुःखध्वंसत्वं तु सुषुप्तिकालीनदुःखध्वंसेतिव्याप्तिः दुःखप्रागभाव
स्य दुःखध्वंससमानकालीनत्वान्न दोषः ॥ ननु द्रव्यगुणकर्मसामान्यविशेषसमवायाभावानां नां
सप्तानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसहेतुरिति कणादेन महर्षिणा कथितं प्रमाण
दृष्टांत प्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासछलजातिनिग्र
हस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्यादिमसूत्रे गौतमेन महर्षिणा षोडशपदार्था
नां तत्त्वज्ञानान्निःश्रेयसाधिगमस्तु तत्कथं सप्तपदार्थोक्तिर्नोत्पद्यते इति चेत् ॥ अत्रोच्यते ॥ षो
डशपदार्थानां सप्तपदार्थेष्वेवान्तर्भावः ॥ सप्तानां पदार्थानां षोडशपदार्थेष्वेवान्तर्भाव इति तत्कथं मि

॥१०॥
॥१॥

फल १

ति वेतार ॥ आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः प्रमेयमिति सूत्रे ऽर्थशब्देन द्रव्या
दिपदार्थानामभिधानात् ॥ स्वरूपात्मकप्रत्यक्षप्रमाणानां द्रव्येष्वन्तर्भावः ॥ फलात्मकतेजःप्रत्यक्षप्रमायाः
अनुमानोपमानशाब्दप्रमाणानां प्रमायाश्च ज्ञानात्मकत्वाद्गुणेष्वेवान्तर्भावः तर्हि प्रमाणानां पृथक्निरूप
णं किमिति कृतमिति चेत् ॥ न सर्वेषां पदार्थानां व्यवस्थाया नस्य प्रमाणाधीनत्वात् ॥ एवं प्रमेयत्वं प्रमाविष
यत्वं प्रमाविषयपदार्थाः इति प्रमेयपदार्थयोरभेदः एवं संशयादिषोडशपदार्थानां गुणादिष्वेव ॥ अन्ये चरीत्या विवक्षि
तविवेके न षोडशपदार्थानां सप्तपदार्थेष्वन्तर्भावः ॥ सप्तपदार्थानां षोडशेष्वन्तर्भाव इति सुधीभिर्विभाव्या विभा
न्य व्यबोध्यं ॥ तथाबकणादेन संक्षेपेणोक्तत्वे मन्तुं विस्तारेणोक्तः तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाश
प्प कालदिगात्ममनांसि नवैव ॥ अन्यापि न वृत्यन्तरस्य ॥ अनेकारेण द्रव्यस्य सतः सुवर्णादेर्नवत्वेषु हि व
बो व्यवच्छिद्यते नवकोष्ठस्यापि कारादेर्द्रव्यत्वं व्यवच्छिद्यते तथा च पचादिनवान्यस्मिन्द्रव्यत्वस्य पोगोप
वच्छिद्यते रसस्य कोणे व्यवच्छेदो ऽत्रेबोध्यः ॥ तत्र द्रव्यत्वजातिमद्द्रव्यं गुणान्यो वा गुणवद्वा तिसत्ताभिन्न
जातिमत्त्वं वा ॥ ते न प्रथमक्षणे गुणान्यत्वे पि नपि क्षतिः ॥ ननु सुवर्णं तामससोद्रव्यान्तरस्य ॥ कथं

स्वनि १

मितं वशादेकैकसंख्येति । नित्यद्रव्यवृत्तयो विशेषाः । विशेषास्त्वनंता एव अंते अवसाने वर्तंत इति ते अंत्याः । येभ्यो ... विशेषाः व्यति
र्थः । अनित्यद्रव्याणां तु तत्तदवयवसंस्थानरूपादिकं परस्परं भेदबुद्धिजनकं नित्यद्रव्यासदृशां नाना परमाणु ...
परस्परं भेदकाविशेषाकाश्चेते चतत्तत्सूक्ष्मनिमित्तभेदकैकारवते स्वतः स्वतःएव स्वस्वरूपभेदबुद्धिजनकाः । शिरोमणिचर
णास्तु । पृथ्वीविशेषाणां दवैस्वतैस्वस्वभेदबुद्धिजनकास्त्वापरमाणवोपि स्वतएवस्वस्वरूपभेदबुद्धिजनकाइति किं

द्रव्य स्यतेज १

नवैवेस्तु द्रव्यमिति चेन्नस्तुवर्णस्य तन्मोक्ता । तमसस्तेजोभावोतेर्भावादित्रिवंचैपिष्यते चेदमुपरिष्टात् ॥ गुणा
स्तु रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छा
द्वेषप्रयत्नस्नेहसंस्कारधर्माधर्माश्चतुर्विंशतिरेव तत्र गुणत्वजातिमान् गुणाः । न च गुणादीनां
निर्गुणत्वात् कथं गुणे चतुर्विंशतिसंख्या द्रौत्येति वाच्यं ॥ एकार्थसमवायेन ... संख्यादिति प्रतिपे
नस्नाव... संख्याव्याप्त्यस्वीकारात् तथा कर्मत्वपि ... कर्मत्वजातिमत् कर्म ... पता प्रत्ये
पराकुंचनप्रसारणगमनानि पंचैव कर्माणि एवकारस्तु भ्रमणादीनां कर्मणि अंतर्भावादर्थः ।
गमनत्वे च नस्यंदनोर्ध्वज्वलनतिर्यग्गमनानामंतर्भावादिति ... समनेकसमवेतं सामान्यं वाद
सामान्यं द्विविधं परमपरं च परापरं चेति तत्र परं सत्ता द्रव्यादिकवर्तित्वेनव्यापकत्वात् । अपरं घटत्वादिद्रव्यत्वादि
दिकं पृथिवीत्वाद्यपेक्षया ... वर्तित्वात् ॥ परापरं च पृथिवीत्वद्रव्यत्वादिकं घटत्वाद्यपेक्षया अधिकवर्ति
त्वात् । परं सत्तापेक्षया न्यूनवर्तित्वादपरं चेति मिलितद्वयेपि देशात् संज्ञोदपमिति सत्ताघटत्वयोस्तु एकै ... ×

॥५॥

प्रतीतिर् ध्वंसश्च

योरूपवत्ताप्रतीतिस्स्यादिति वाच्यं ॥ रूपाभावादेव तत्प्रतीतेरे भावात् ॥ जले स्नेहः समवायेन गंध
समवायस्त्वत्यादिकं एवं समवायस्य नानात्वे प्रमाणाभावात् समवायत्वं एकं ... इति शिरो
मणिचरणाः ॥ अभावो द्विविधः । संसर्गाभावान्योन्याभावभेदात् ॥ अत्र संसर्गाभावत्वं
संसर्गावच्छिन्नप्रतियोगिताकाभावत्वं संसर्गश्च संयोगसमवायान्यतरत्वं ध्वंसप्राग
भावयोस्तु प्रतियोगिसमवायिदेशकालापादिवृत्तिलक्षण उपमस्तिः । तत्र संसर्गाभावस्त्रि
विधः । प्रागभावप्रध्वंसात्यंताभावभेदात् ॥ तत्रानादिः सांतः प्रागभावः ॥ सादिरनंतः
ध्वंसः । नित्यसंसर्गाभावोत्यंताभावः ॥ अत्रात्यंताभावस्य प्रतियोगिवत् ध्वंसप्रागभावयो
रपि विरोधः । रक्तरूपवत्ति श्यामवति च भाविरक्तरूपप्रागभाववति घटे रक्तरूपं ना
स्तीति प्रतीतिस्तु प्रागभावध्वंसावगाहते न तु अत्यंताभावमिति प्राचः ॥ तन्मते रक्तं न श्या
मते पूर्वरक्तरूपध्वंसवति भाविरक्तरूपभाववति रक्ते घटे रक्तरूपं नास्तीति प्रतीत्यापत्तेः ।
तत्रोत्पत्तिविनाशशाली सामयिकात्यंताभावः स्वीक्रियत इति शिरोमणिचरणाः ॥ तादा
त्म्यसंबंधावच्छिन्नप्रतियोगिताको भावो न्योन्याभावः ॥ ...: समवायेन घटवति कपा
ले संयोगेन च घटवति भूतले घटान्योन्याभावस्य सत्त्वाद्वेतदुभयसंबंधेन प्रतियोगिनासमं

सि.मु। ॥६॥

नान्योन्याभावस्य विरोधः॥ तादात्म्यसंबंधेन घटवति पटे घटान्योन्याभावस्यासत्त्वात् तादात्म्यसंबं
धेन प्रतियोगिना समं विरोध इति॥ तादात्म्यसंबंधपदं चान्योन्याभावस्य प्रतियोगितावच्छेदक
संबंधपरं इति॥ अत्र तादात्म्याभावान्योन्याभावयोरैक्येपि तावच्छेदकावच्छिन्नप्रतियोगिताकत्वे
ऽप्रतिवत्त्वमन्योन्ये नीले घटवति पटे नास्ति नीलो घटो न घट इत्यादयो न प्रयोगा इति॥ अ
पेक्षामान्योपदार्थानां अभिधेयत्व ज्ञेयत्व प्रमेयत्वं च वाच्यत्वं कारणत्वं साधर्म्यं॥ नत्वपरमा चे५
णुपरिमाणस्य कस्यापि कारणत्वाभावात् तत्राव्याप्तिरिति वाच्यं॥ तस्यापि ज्ञानप्रति
विषयविधया कारणत्वात्॥ परमाणवो नित्याः नित्यपरिमाणवत्वात् आकाशवत्॥
इत्यत्र ज्ञायमानलिंगकरणतावादिमते अणुपरिमाणस्यानुमितिं प्रति कारणत्वाच्च यद्वा वि
षयविधया पारिमांडल्यस्य योगिप्रत्यक्षे न कारणत्वं॥ ज्ञायमानं लिंगं नानुमितिकर
णमिति विभाव्यते त्वन्मते पारिमांडल्यभिन्नानां सप्तानां पदार्थानां कारणत्वं साधर्म्यं पा
रिमांडल्यं परमाणुपरिमाणं॥ अणुपरमाणुपरिमाणस्यापि द्व्यणुकपरिमाणं प्र
ति कारणत्वं संभवतीति चेन्न। परिमाणस्य स्वसमानजातीयोत्कृष्टपरमाणारंभकत्वेन म
हत्परिमाणस्य महत्तरपरिमाणारंभकवदणुपरिमाणस्याण्वतरपरिमाणारंभक

राम॥ ॥६॥

कारणत्वं२
वापि८

॥ तत्र संख्यादिति द्वंद्वमुपलक्षणं॥ अन्यथा वयविरूपरसगंधस्पर्शसंख्यापरिमाणानां ज्ञाना
॥ति रिक्तं कार्यं प्रतिपारिमांडल्यवत् अकारणत्वं॥ तथा च पारिमांडल्यादिभिन्नानां ज्ञाना
तिरिक्तं कार्यं प्रति कारणत्वं साधर्म्यं ज्ञानं प्रति त्वेतेषामपि भवत्येव॥ अत्र कारणत्वं का
र्यनियतपूर्ववृत्तित्वं कारणं त्रिविधं॥ समवायिकारणमसम
वायिकारणं निमित्तकारणं चेति॥ तत्र यस्मिन् समवायसंबंधेन कार्यमुत्पद्यते तत्त
स्य समवायिकारणं यथा तंतवः पटस्य समवायिकारणं॥ कार्येण कारणेन वा समवेतत्वे स
ति यत्कारणं तदसमवायिकारणं॥ यथा तंतुसंयोगः पटस्यासमवायिकारणं॥ समवायि
कारणासमवायिकारणभिन्नत्वे सति यत्कारणं तन्निमित्तकारणं॥ यथा तुरीवेमादि
कं पटस्य निमित्तकारणं॥ तत्रासमवायिकारणं द्विविधं॥ एकं कार्येकार्थप्रत्यास
द्वितीयं कारणैकार्थप्रत्यासत्त्या च॥ कार्येकार्थप्रत्यासत्तिर्यथा॥ तंतुद्वयसंयोगस्य
कार्येण पटेन सह एकस्मिन् तंतौ तंतुद्वयसंयोगस्य समवेतत्वमस्तीति तंतुद्वयसं
योगः पटस्य पटस्यासमवायिकारणं॥ एवं पटरूपस्य तंतुरूपमसमवायिकार
णं॥ यथा पटरूपस्य कार्येण पटेन सह एकस्मिन् अर्थे तंतौ समवेतं तंतु

संक्षेपतः। द्रव्यादिलक्षणसमं भावत्वं पंचानामनेकत्वे सति भावत्वं १॥

॥रूपमिति तंतुरूपमसमवायिकारणं पटरूपस्येति। ननु पटं प्रति तुरीतंतुसंयोगोप्यस
मवायिकारणं स्यादिति। तुरीतंतुसंयोगस्य कार्ये नपटे नसहैकास्मिन्न तंतौ तुरीतंतुसंयो
गस्य समवेतत्वादिति चेन्न। परासमवायिकारणलक्षणे तुरीतंतुसंयोगान्यत्वस्य विव
क्षितत्वात्॥ अतएव चरीत्याऽन्यत्रापि सन्निवेशेषितत्कार्पाससमवायिकारणलक्षणे तुत
दन्यत्वं विशेषणीयमिति॥ नचासमवायिकारणसामान्यलक्षणे तुरीतंतुसंयोगान्यह
देयमिति वाच्यं। तुरीपटसंयोगं प्रति तुरीतंतुसंयोगस्य हेतुत्वात्॥ नचासमवायोगाऽ
न्यानामात्मविशेषगुणानां ज्ञानादीनामुत्पत्तौ तदसमवायिकारणत्वं ध्वादिकं प्रत्यसमवायिकारणत्वं
त्वं स्यादिति वाच्यं। ज्ञानादीनामसमवायिकारणत्वाभावात् समवायिकारणसामान्य
लक्षणे ज्ञानाद्यन्यत्वस्य विशेषणत्वात्॥ तथा च कार्यैकार्थकारणैकार्थान्यतरप्रत्यास
त्त्या कारणमात्मविशेषगुणभिन्नमसमवायिकारणमित्यसमवायिकारणसामान्य
लक्षणं बोध्यं॥ अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतं अ
न्यथासिद्धं यथा घटादिकं प्रति दंडादिकमवश्यक्लृप्तं तत्सहभूतं दंडत्वं दंडरूपं आकाशकुला
लपितारासभादिकमन्यथासिद्धमिति ४

पा

क्षिर रग।४

त्र१

तिनावत्वं न च प्रत्येकं घटादावाकाशादौ वानेकत्वाभावादव्याप्तिरिति वाच्यं॥ अनेकभाववृत्तिपदार्थविभाजकोपाधिम
त्त्वस्य विवक्षितत्वात्॥ चतुर्णां विशेषभिन्नत्वे सति समवेतत्वं असमवेतत्वं समवेतवृत्तिपदार्थविभाजको
पाधिमत्त्वं तेन न निःसद्द्रव्ये नाद्दृश्यस्य द्रव्यत्वस्य सत्त्वान्नाव्याप्तिः॥ द्रव्यान्यसमवेतत्वं द्वयोः कर्मत्वासमानाधिक द्र२
रणजातिमत्त्वं॥ गुणादीनां द्रव्यत्वासमानाधिकरणा निर्गुणत्वात्॥ द्रव्यत्वासमानाधिकरण[illegible]निःक्रियत्वं च
तेनाद्यक्षणावच्छिन्ने निर्गुणे द्रव्ये आकाशादौ च निःक्रियत्वस्य सत्त्वेपि नातिव्याप्तिः। सामान्यादीनां निःक्रि
सामान्यवत्त्वं॥ आत्मविशेषगुणभिन्नगुणकर्मणोरसमवायिकारणत्वं असमवायिकारणवृत्तिद्रव्यास
मवेतजातिजातिमत्त्वं वा॥ तेन ज्ञानादीनामसमवायिकारणत्वविरहेपि नाव्याप्तिः॥ एतस्य ज्ञानादीनां साधा सा४
रण्यात्॥ संयोगसमवायान्यतरसंबंधेनाश्रितत्वं निःसद्द्रव्यभिन्नानामेव कालिकविशेषणतया संबंधेन
वृत्तित्वात् तेन कालिकविशेषणतया विशेष्यतानिःसद्द्रव्याणां कालादौ वृत्तित्वेपि नसतीतिः॥ अथ पृथि
गुण१ व्यादिनवानां द्रव्यत्वं योग्यत्वं च समाचर्मद्रव्यत्व जातिसिद्धिस्तु संयोगस्य विभागस्य वा समवायिकारण

विभुह वायु संतद्वार

तावच्छेदकतयेति॥ पृथिव्यप्तेजोमनसां मूर्तत्वं तच्चेयत्तावच्छिन्नपरिमाणयोग्यत्वं जातिविशेषो वा क्रिया
समवायिकारणतावच्छेदकतया मूर्तत्वस्य जातित्वसिद्धेः परत्वापरत्वक्रियावत्त्वं वेगवत्त्वं च साध
र्म्यं पृथिव्यादिचतुर्णां स्पर्शवत्त्वं॥ अंस्पर्शवद्विभिन्नानां चतुर्णां द्रव्यारंभकत्वं पंचानां भूतत्वं ...न्यत्व
विशेषगुणवत्त्वं॥ पृथिव्यादिपंचानां आत्मनश्च विशेषगुणयोग्यत्वं॥ तत्रैके द्वियमात्रमात्मत्वं जीवाकाशयोर्वि
गुणान्यविशेषगुणवत्त्वं॥ अव्याप्यवृत्तिविशेषगुणवत्त्वं लक्षणकविशेषगुणवत्त्वं चाजन्यज्ञानाश्रयत्वं
स्य चाविलजन्यविशेषगुणवत्त्वमव्याप्यवृत्तिं चेति॥ पृथिव्यप्तेजसां प्रत्यक्षविषयत्वं रूपवत्त्वं द्रवत्वं वेगवत्त्वं चेति॥ २१५
तत्र पृथिवी तेजसोर्नैमित्तिकद्रवत्वं जले तु सांसिद्धिकद्रवत्वं वेगवत्त्वमिति॥ अत्र प्रत्यक्षविषयत्वं परिमाणव
व्याप्तं॥ अतिव्याप्तमात्मनि रूपादावितियेन्नाओ... प्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिम
त्त्वस्यैव विवक्षितत्वात्॥ अत्र द्रवत्ववत्त्वं घटादौ वह्नौ च प्रत्यक्षप्रतिपादितं चाद्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजा ष्टि
ति... पिसमाधेयमिति पृथिवीजलयोः रसवत्त्वं गुरुत्वं चेति येषां पि साधर्म्यं परेषां
... वैधर्म्यमितिराश्चार

||२१५||
||९||

संख्यापरिमाणपृथक्त्वे ६

न द्वे धर्मप्रमेयत्वादिके वलान्वयित्वात् कस्यापि द्वेधर्म्येन प्रमेयत्वादीनां व्यावृत्तिबुद्धिजनकत्वाभावेन ल
क्षणत्वाभावः॥ व्यवहारलक्षणे तु लक्षणत्वे मवश्यमेव रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसं
योगविभागपरत्वापरत्वगुरुत्वद्रवत्ववेगाः श्चैतिपृथिवीगुणाः गंधरहिताः पृथिवीगुणाः स्नेहसहि
ताः जलगुणाः॥ रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्ववेगाः तेजसो गुणाः॥
स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगाः वायुगुणाः॥ संख्यापरिमाणपृथक्त्वे संयोग
संयोगविभागशब्दाः गगनगुणाः॥ संयोगविभागाः कालदिशोः॥ संख्यापरिमाणपृथक्त्वे संयोग
विभागबुद्धिसुखदुःखेच्छाप्रयत्नद्वेषधर्माधर्मसंस्काराः जीवात्मगुणाः॥ संख्यापरिमाणपृथक्त्व
संयोगविभागाः बुद्धीच्छाप्रयत्नाश्चेति परमात्मगुणाः॥ इति संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा
मनो घो परत्ववेगा गुणाः इति संग्रहः॥ श्चकालां नवैकादशतेजसो गुणाः जलक्षितिप्राणभृतां चतुर्दश दिक्कालयोः पंच
षडेव चाष्टौ महेश्वरेष्टौ मनसस्तथैव च॥ गंधवती पृथिवी पृथिवीत्वं गंधसमानाधिकरणतो गन्धेतरत्वा
वच्छेदकत्वाधिकरणत्वं गंधवत्त्वाद्वत्तिर्नस्य गंधस्य पत्रकुत्रापि तुल्यतिस्यादिति सा वच्छिन्नोक्त
त्वव्यतिनिर वच्छिन्नस्य कारणत्वे गंधत्वावच्छिन्नस्य गंधस्य पत्रकुत्रापि तुल्यतिस्यादिति सा ब

नन्वेवमात्मनोऽपि भोगायतनत्वे शरीरत्वापत्तिः ... यदवच्छेदेन ... प्रध्वंसजन्यत्वं तदुपादानोपादेय
भिन्नधाराजिह्वा ... केवलमनोभिव्याप्तत्वात्स्मृतिहेतुः ... अत्र यत्र द्रव्यध्वंसजन्यमिति हेतुकेशादिभिः
केव्याभिचारवारणाय प्रथमं द्रव्यपदं। इति ... प्रध्वंसजन्यपुत्रेः ... व्याप्तिवाय

... पुरस्तात्॥१ वि परमाणुजन्यत्वात्॥१

वे तात्केवलेति॥ यदवच्छिन्नात्तदेवपृथिवीत्वमिति॥ सा चाद्विधा। नित्यानित्या चेति नित्या। कार्यरूपा त्वनित्या॥ सा च नित्या
पि शरीरेन्द्रियविषयभेदात्त्रिधा। शरीरं तु आत्मनो भोगायतनं भोगायतनं तु यदवच्छिन्नात्मनि
जायमानं भोगसुखदुःखसाक्षात्कारः शरीरमस्मदादीनां प्रत्यक्षसिद्धं। इन्द्रियं गन्धव्यंजकं
घ्राणं। विषयो घटपटादिः॥ तत्र शरीरं द्विविधं॥ योनिजमयोनिजं च। योनिजं तु जरायुजमण्डजभे
देन द्विविधं। तत्र जरायुजं मनुष्यादीनां॥ अण्डजं पक्षिसर्पादीनां॥ अयोनिजमपि स्वेदजोद्भिज्जादिभेदेन
द्विविधं। स्वेदजः क्रमिमशककीटादयः॥ उद्भिज्जो वृक्षलतादयः॥ शरीरमस्मदादीनां चेष्टाश्रयः। चेष्टा
तु हिताहितप्राप्तिपरिहारार्था क्रिया॥ इन्द्रियं गन्धव्यंजकं घ्राणं। न च तस्यापार्थिवत्वे किं मानमिति वाच्यं॥ तत्र
गन्धत्वे न पार्थिवत्वानुमानात्॥ गन्धवत्त्वे ... कथमिति चेत्॥ घ्राणेन्द्रियं गन्धवत्॥ रूपादिषु पंचसु मध्ये गं
धस्यैवाभिव्यंजकत्वात्॥ वायुरुपनीतचंपकभागवत्॥ मनसि व्यभिचारवारणाय रूपेति कारः॥ गन्धस्यै
वाभिव्यंजकत्वं तु गन्धान्यव्यंजकत्वे सति गन्धव्यंजकत्वं तथा च गन्धवत्त्वाद्देरपि व्यंजकत्वात्

घ्रा
व
दी
व
द्रव्यत्वे सति

मितिव्याप्ता ... ध्वंसजन्यत्वे ... द्रव्य परमिति४८

त्वाद्देरपि व्यंजकत्वात्॥ हेतुसिद्धिरत उक्तं रूपादिषु पंचस्विति। द्रव्यत्वे सतीति विशेषणात्त्वात्। घ्राणेन्द्रिये
सन्निकर्षेण व्यभिचारः रूपादिषु पंचसु मध्ये। भ्रमसाधारणं च इन्द्रियं यद्गुणं गृह्णाति तदिन्द्रियं त
द्गुणवदिति व्याप्तेः। भ्रम ... इन्द्रियमिति ... मनसि। तन्नादित्याह केवलेति। तन्नादि ... बाध्य
मिति व्यभिचारवारणाय रूपादिषु पंचस्विति उक्तं। मनसो रूपादिग्राहकत्वात् व्यभिचारवारणाय। सा
रात्। नेत्युक्तं॥ उपभोगकारणं विषयः कार्यत्वावच्छिन्नं प्रति अदृष्टं कारणं। यत्कार्यं यद्द्रव्यजन्यं
तद्दुपभोगजनकमितीतिनियमात्। तेन द्व्यणुकादिकमारभ्य ब्रह्माण्डान्तपर्यन्तसाक्षात्परंपरया
वोपभोगजनकत्वात्तद्विषय इति स्नेहेन सांसिद्धिकजलं। तथा च जनकतावच्छेदकं तथा जलत्वजातिसिद्धिः
पर्यात्ति नियमाभिन्नत्वं ... स्नेहत्वं न कार्यतावच्छेदकं तथापि स्नेहत्वावच्छिन्नं प्रति जन्यजलत्वेन कार
णता। जन्यजलत्वावच्छिन्नं प्रति जलत्वेन कारणतेति बोध्यं। तेन परमाणौ जन्यजलत्वाभावे

इति
न

१०।

ध्रा३

पि तज्ज्ञानकतावच्छेदकतया जलत्वसिद्धिः॥ परंतु पृथिवीत्वं गुरुत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजा
तिमित्त्वं जातिश्चेत्। तेजस्यव्यवहितत्वमनुमानेन गुरुत्ववद्वृत्तिजातिमत्त्वे पृथिवीत्वे सिद्धे तत्साक्षाज्जा
तिर्जलत्वमिति जलत्वजातिसिद्धिः॥ व्याप्यत्वं व्याप्यत्वे सति व्याप्यत्वं साक्षाद्व्याप्यत्वमिति दृष्टं॥ त
च्च जलं द्विविधं नित्यानित्यभेदात्॥ परमाणुरूपं नित्यं॥ अनित्यं कार्यरूपं॥ तदपि शरीरेन्द्रिय
विषयभेदात् त्रिविधं॥ शरीरं वरुणलोके प्रसिद्धं तच्चायोनिजं जलखंडरूपं तदा तां पार्थिवा
वयवोपष्टंभेनकवशाद् उपभोगसामर्थ्यं॥ इंद्रियं रसनं जिह्वाग्रवर्ति रसवत्॥ रूपादिषु पंचसु मध्ये नत्त्वे
रूपस्यैव सति रसस्यैवाभिव्यंजकत्वात्॥ सलिलं रसाभिव्यंजकं जलवत्॥ इत्यनेन पदकृत्येन ना
तरसनेन्द्रिये सन्निकर्षेण व्यभिचारः॥ विषयः सरित्समुद्रादिरिति॥ उष्णस्पर्शवत्तेजः॥ त पाच
जोलक्षणवदत्रापि उष्णस्पर्शसमवायिकारणतावच्छेदकतया तेजस्त्वजातिसिद्धिः॥ उष्णस्पर्श १०

हो४

कू२ तशं३

वत्तित्वं जातिः प्रत्यक्षसिद्धा भास्वरशुक्लरूपवत्॥ तेजोलक्षणं तु भास्वररूपवत्त्वं॥ अभिभ
स्य वैयर्थ्याच्च॥ भास्वरत्वं रूपशुक्लत्वव्याप्यजातिविशेषः॥ सुवर्णाविशेषेऽपि शुक्लरूपे सति पिप
र्णरूपेणाभिभवाद्व्यवहारः॥ तेदाग्रे पयसि तु अन्यरूपेणाभिभव इति॥ अभिभवस्तु बलव
त्सजातीयग्रहणकृतग्रहणाभाव इति॥ तच्च तेजो द्विविधं नित्यमनित्यं च॥ परमाणुलक्षणं नि
त्यं॥ कार्यलक्षणमनित्यं॥ तच्च शरीरेन्द्रियविषयभेदात् त्रिविधं॥ शरीरमादित्यलोके॥ इंद्रियं रूप
व्यंजकं चक्षुः कृष्णताराग्रवर्ति॥ विषयस्तु भौमदिव्यौदर्याकरजभेदाच्चतुर्विधं॥ तत्र भौमं वह्न्या
दि॥ दिव्यं विद्युदादि तच्चाबिंधनं॥ औदर्यं जठरस्थं तदपि अबिंधनं॥ आकरजं सुवर्णादि॥ ज
न ननु सुवर्णस्य तैजसत्वे किं मानमिति चेत्॥ अत्रोच्यते॥ सुवर्णं तैजसं॥ अत्यंतानलसंयोगे
सत्यनुच्छिद्यमानद्रवत्ववत्त्वात्॥ यन्नैवं तन्नैवं यथा पृथिवी अत्यंतानलसंयोगे सत्यनुच्छिद्यमा
न नद्रवत्ववत्त्वाभावः पयःप्रभृतिषु॥ पीतिमगुरुत्वाश्रयस्य सुवर्णपार्थिवस्य भावे १२

न व ०

च्यतीतिवाच्यं॥ ननु वर्तमानस्य वीतिमगुरुत्वात्सपत्ताभावात् तत्त्वादि॥ कीतिमगुरुत्वाच्च पाः वि
जातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः अभिसंतानलसंयोगे सति परिवर्तरूपविजातीयरू
पानुत्पादकरणत्वात्॥ तत्र संयोगान्तर्नीतपटवत्॥ तद्विजातीयरूपप्रतिबन्धकद्रवद्रव्य
तैजससुवर्णमेव पक्षविजलपोः द्रवत्वस्य संतानलसंयोगनाशकत्वात् तेषां विल
क्षणत्वं द्रव्यं ननु वर्णो यद्द्रवीभूतपार्थिवोपष्टंभकं भागे व्यभिचार इति वाच्यं॥ उप
ष्टंभकभागस्य द्रवत्वाभावात्॥ किंतु असंतानलसंयोगे न कीतिमरूपत्वाच्च योगपष्टं
भकभागानां घृतलवणादिपर्वतोर्जितविलक्षणपरीतलजलेष्वप्रसक्तातारीकरणवदिति॥ तद्वे
नैवाग्न्यादिकं द्रव्यं॥ द्रवत्ववत्वादित्यादिप्रयोगात्॥ ननु वर्णो नैसर्गिकमिति संक्षेपः अपा ज
कजानुष्णाशीतस्पर्शवान् वायुः रूपवत्त्वादृष्टस्पर्शजनकतावच्छेदकतया वा
युत्वजातिसिद्धिः॥ स च वायुः द्विविधः नित्यानित्यभेदात्॥ नित्यः परमाणुरूपः अनि
त्यः कार्यरूपः सोऽपि शरीरेन्द्रियविषयभेदात्त्रिविधः॥ शरीरं वायुलोके इदं १२

प्राप प २

द्रियं स्पर्शव्यंजकं त्वक्। तच्च सकलशरीरव्यापि तच्च वायवीयं॥ रूपादिषु पंचसु म
ध्ये द्रव्यत्वे सति स्पर्शस्यैवाभिव्यंजकत्वात्॥ अंगसंगसलिलशैत्याभिव्यंजक
व्यजनपवनवदिति॥ विषयो वृक्षशाखादिकंपनजनकः स च शाखाकंपनादिना
नुमेयः॥ ननु प्रत्यक्षस्पर्शवतीति प्राणः शरीरान्तःसंचारी वायुः। स चैकोऽपि हृदादिपंच ह
स्थानभेदात्॥ प्राणादिपंचनिर्गमनादिक्रियाभेदाच्च॥ संज्ञापंचकं प्राप्नोति पंचस्थानानि
तु हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कंठदेशस्थायी व्यानः सर्वशरीरगः इति॥
ननु वायुः स्पर्शवानिति प्रतीतेर्वायोः स्पार्शनप्रत्यक्षसंभवेऽपि प्रत्यक्षमेवेति चेन्न। न तत्र स्पर्शस्यैव प्रतीती
तिविषयत्वात्॥ वायोस्तु सतीतिविषयत्वे नीरूपस्यापि बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं स्यादिति॥ बहि
रिंद्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वे सत्युद्भूतस्पर्शव दा
त्त्वेन हेतुत्वात्॥ वायोस्तादृशरूपाभावान्न बहिरिंद्रियजन्यस्पार्शनप्रत्यक्षमिति सांप्रदायिकाः॥ नव्या
स्तु द्रव्यचाक्षुषत्वावच्छिन्नं प्रति महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वेन कारणत्वं॥ स्पार्शनप्र

ग

सम्भवावच्छिन्नं प्रति तु महत्त्वसामानाधिकरण्योद्भूतस्पर्शवत्त्वेन कारणमिति वायौ तादृशस्पर्शवत्त्वात् स्पा
र्शनप्रत्यक्षं भवत्येव बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति महत्त्वसामानाधिकरण्योद्भूतरूपवत्त्वे
नेति कार्यकारणभावे प्रमाणाभावात्। उभयोः प्रत्यक्षे व्यभिचाराद्वेत्याहुः॥ अथेदानीं कार्यद्रव्याणामु
त्पत्तिविनाशक्रमः कथ्यते॥ तत्र परमकारुणिकस्य भगवतो महेश्वरस्य सिसृक्षावशात् परमा
णौ क्रिया ततो विभागः विभागात् पूर्वसंयोगनाशः ततः आरम्भकपरमाणुसंयोगस्ततो द्वाभ्यां पर
माणुभ्यां द्व्यणुकमुत्पद्यते ततः त्रिभिर्द्व्यणुकैः त्र्यणुकमुत्पद्यते ततश्चतुरणुकादिक्रमेण मह
स ती पृथिवी समुत्पद्यते ततो महज्जलमुत्पद्यते ततो महत्तेजस्ततो महान् वायुरिति क्रमेण ब्रह्मा
ण्डपर्यन्तमुत्पत्तिरिति॥ अथोत्पन्नस्य कार्यद्रव्यस्य भगवतो महेश्वरस्य संजिहीर्षा जायते त
दा खण्डप्रलयो महाप्रलयश्च जायते॥ तत्रावान्तरप्रलयः कार्यद्रव्यविनाशस्तदानीं सदृशस्य
सद्भावात्। पुनरुत्पत्तिः खण्डप्रलये प्रमाणं तु धाता यथापूर्वमकल्पयदिति श्रुतिः॥ महाप्रलयस्तु भा
म वकार्यमात्रस्य विनाश इति पुनर्नोत्पत्तिः सिसृक्षानिर्दिष्टानामभावात्॥ नहि बीजं प्रयोजनाभावाच्च विना
कस्यचिदुत्पत्तिरस्ति॥ ननु महाप्रलयसद्भावे किं मानमिति चेत्॥ ॥१९२

स अपकृष्ट ६

क्रियाप २ अत्रोच्यते॥ नासदासीन्नो सदासीत्तदानीमिति श्रुतिरेव प्रमाणमिति। यदा परमेश्वरस्य संजिहीर्षा
वशात् परमाणौ क्रिया ततो विभागः ततः आरम्भकसंयोगनाशः ततो द्व्यणुकनाशे सति त्र्यणुक
विनाशः ततश्चतुरणुकादिनाश इत्येवं क्रमेण महत्याः पृथिव्या विनाशः एवं क्रमेण महतोऽ
म्भसो विनाशः महत्तेजसो विनाशः महद्वायुविनाश इति समवायिकारणविनाशात्॥ त्र्यणु
कादिकार्यविनाशः द्व्यणुकनाशस्त्वसमवायिकारणविनाशाद्भवति॥ सर्वत्रासमवायिका
रणनाशात्कार्यनाश इत्यपरे॥ अत्रेदं प्रतिभाति परमाणुद्व्यणुकयोर्भिन्नाभावः त्रुटावेव वि [redacted]
श्रामात्॥ ननु त्रसरेणुः सावयवः महत्त्वे सति कार्यद्रव्यत्वात् महद्द्रव्यत्वात् घटवत् त्रसरेणवयवाः सा [redacted]
वयवाः महद्द्रव्यारम्भकत्वात्॥ कपालवदित्यनुमानात् परमाणुद्व्यणुकयोः सिद्धिरिति वा
च्यं॥ [redacted] तुमानस्याप्रयोजकत्वात् लाघवा द्रूप
त्रुटावेव विश्रामः एवं च परमाणुद्व्यणुकयोः अस्वीकारात्॥ प्रत्यक्षं प्रति महत्त्वस्य कारण
घ ताभावे महत्त्वाघवमिति। यद्यपि परमाणुद्व्यणुकयोः स्वीकारे तु द्रव्यचाक्षुषत्वावच्छिन्नं

त्रु २ मि २ अं २ पा२वत्त्वतद्व५

तर्कसं॰
११२

श्री

प्रतिचक्षुःसंयोगकारणं द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतत्वेन कार
णत्वेन कार्यकारणभावद्वयेऽप्रामाण्याभावः चक्षुःसंयुक्तसमवेतसमवेतत्वेनैव कारणत्वनि
र्वाहात् तथाविधमहत्त्वस्य कार्यकारणभावकल्पनेनैव परमाणुद्व्यणुकयोस्त्वीकारेण
चमहत्त्वं गौरवमिति ध्येयं ॥ शब्दगुणकमाकाशं तच्चाकाशमेकं नित्यं च ॥ एकव्यक्तिकत्व
२५ त्व ॥ नैकव्यक्तिकं सामान्यं नित्यमनेकसमवेतं सामान्यमिति जातेर्लक्षणं ॥ तच्चैकाका
शब्द शात्वं पाचकाकाशत्वं समवायिकारणमिति ॥ एवं कालत्वं दिक्त्वमपि नेत्याज्ञातव्यम् ॥ स
चाकाशः निरवयवविभुत्वस्पर्शरहितविषयोरभावे प्रदीपं तेनैव कर्णशष्कुलीविवराव
च्छिन्नमाकाशं ॥ दिक्कालजन्यपरत्वापरत्वयोरसमवायिकारणं संयोगाश्रयो वि
भुः कालः ॥ स एवं च कालिकं तु कालिकपरत्वापरत्वयोर्नामान्तरं ॥ अत्र ज्येष्ठपिण्डः परत्व
स्य समवायिकारणं कनिष्ठपिण्डश्चापरत्वस्य समवायिकारणं कालपिण्डसंयोगस्तु
परत्वापरत्वयोरसमवायिकारणं ॥ तत्र एवं कालो समवायिकारणमस्यापरत्वस्यापरस्यो ॥राम॥ ॥१४
ज्यकालोपलो

५८

घ६

श्रि२ त१

दपरत्वबुद्धिः परत्वापरत्वयोर्निमित्तकारणमिति ॥ अतीतादिव्यवहारहेतुर्वा कालः स च कार्यमात्रं प्रति निमित्तकारणं ॥ अग
त्याधारश्चेति ॥ इदानीं घटः इति प्रतीतिः सूर्यपरिस्पन्दादिकं विषयीकरोतीति सूर्यपरिस्पन्दैः सह घटादेः संबन्धः वाच्यः ॥
स च संबन्धः संयोगः स न व्याप्यवृत्तिः न संभवतीति कालः एवं तत्संबन्धघटकः कल्प्यते इति संबन्धघटनावेव ॥ सूर्यपरिस्पन्दः
सूर्येण सूर्यसंयोगः कालेन कालः संयोगः पिण्डे इति ॥ स चैकोऽपि क्षणादि उपाधिभेदाद्भिन्नः ॥ क्षणस्तु स्वजन्यविभा
गप्रागभावावच्छिन्नं कर्म ॥ पूर्वसंयोगावच्छिन्नविभागो वा ॥ पूर्वसंयोगनाशावच्छिन्नोत्तरदेशसंयोगप्राग
भावो वा ॥ उत्तरदेशसंयोगावच्छिन्नं कर्म वा ॥ विभुत्वे सति कालविपरीतपरत्वापरत्वयोरसमवायि
कारणसंयोगाधिकरणं दिक् ॥ दूरत्वं संनिकृष्टत्वं तु दैशिकपरत्वापरत्वयोर्नामान्तरं ॥ परस्परदेये
स्य पात्रं द्रव्ये बहुतरसंयोगवद्दिक्संयोगो यस्मिन्पुरुषे वर्तते तस्मिन् तस्य तदपेक्ष
यापरत्वमुत्पद्यते ॥ एवं तादृशाल्पसंयोगवत्त्वदिक्संयोगवति चापरत्वमुत्पद्यते ॥ भ
घट वेत्प्राच्यां दिशि सूर्यः तत्र देशसंयोगादेर्घटादेः साक्षाद्दृश्य घटपातनेन सर्वत्र घटकत्वे
न दिक्सिद्धिरिति ॥ सा कार्यमात्रस्य निमित्तं कारणं अत्र परत्वापरत्वयोः पिण्डः सम
चो२

ति मि॰

वापिकारणं॥ यस्य यदपेक्षया परत्वं जायते तस्य तदपेक्षया तत्र परत्वबुद्धि। दिक्कालौ
त्वापरत्वे निमित्तकारणं। दिक्पिंडसंयोगः असमवायिकारणं एवं अपरत्वे बोध्यं॥ तस्या
ह्येकत्वेपि॥ प्राच्यादिव्यवहारभेदः उद्देदः यस्योदयाचलसंनिहिता दिक् तस्य सा प्राची
यस्योदयाचलव्यवहिता दिक् तस्य सा प्रतीची यस्य सुमेरुसंनिहिता दिक् तस्य सो-
दीची॥ यस्य सुमेरुव्यवहिता दिक् तस्य सा दक्षिणा॥ सकलानामेव वर्षाणां मेरुरुत्तर-
तस्थित इति नियमात्॥ ननु प्राच्यां घट इति प्रतीतिरुदयाचलरूपसंयुक्तरूपप्राच्यै-
धेकस्यां संबंधाविरहात् प्राच्यां घट इति प्रतीतिः संभवेनोदयगिरिसंयुक्तरूपसं-
योगः अयमिति दिक्संयुक्तत्वेन घटादौ प्राच्यां घट इति संभवकाला [illegible] संबंध एतयापि
कृसिद्धिसिद्धिरिति॥ ननु उदयाचलसंयुक्तत्वरूपसंयुक्तदिक्संयोगस्य प्रतीची-
स्थघटेपि सत्वात् तत्रापि स्यात् प्राचीस्थ [illegible] सपापत्तेः॥ तेषो पुरुषभेदेन प्राच्यां घ च

प्र१ स्र१

॥राम॥ ११५१॥

दे१ य१

ट इति व्यवहारसंभवः तथाहि॥ यद्देशापेक्षया यस्य पुरुषस्योदयाचलसंनिहितदेशस्य प्राचीता
त्तद्वृत्तिघटादौ स्वस्य प्राचीस्थो घट इति प्रत्ययः प्रतीचीस्थघटादावपि तत्पुरुषापेक्षयोदयाच
लव्यवहितदेशस्य प्रतीचीता तद्वृत्तिघटादौ प्रतीचीस्थो घट इति प्रत्यय इति अनयैव री
त्यानिरुक्तदिक्संयोगस्य प्रतीचीस्थघटे सत्वेपि न क्षतिः॥ [illegible] ननु काल
दिशोरीश्वरातिरिक्तत्वे मानाभावः॥ अस्मिन्काले तस्मिन्काले प्राच्यां दिशि घट इत्या
देः कालदिगभिप्रेतानुगताकारतया कालोपाध्यभिप्रेतस्य पंचपरिस्पंदादेर्दिक्षु प्राच्याभिम
तस्वरूपतत्तद्देशसंयोगादेश्च साक्षात् घटादौ न संबंधः तथा तत्संबंधघटकत्वे परत्वापर
त्वासमवायिकारणसंयोगः॥ अथ यदीश्वरस्य भविष्यतीति किं सर्वतावं गोकापौ तथा
चे प्राच्यां घटः इदानीं घट इत्यादिप्रतीतिनियामकयोः दि[illegible]योः ईश्वराभिन्नत्वे माना
भावरूपाणुः॥ एवमाकाशोपीश्वरान्नातिरिक्तः शब्दसमवायिकारणमीश्वर एव
धे न्चास्मिन् घघट जन्यत्वा [illegible] जीवगुणत्वे वेति वा [illegible] शब्दस्य जीवगुणत्वे सुखा

श१ म्वो॰२

ऽमेके एव न्य

दिवमनोमात्रंग्राह्यं स्यात्॥ अहं सुखवानिति प्रतीतिवद् देहं धारयवानिति प्रतीत्यापत्ते ईश्वरः
श्वरः शरीरवानिति प्रतीत्यापत्तेरिति॥ श्रोत्रमपि कर्णशष्कुलीविवरावच्छिन्नं ईश्वरस्य
वा॥ गगनस्य ईश्वरांशता॥ न च कर्णश्रोत्रमस्तु केर्णेन शब्दो मीति प्रतीतेरिति वाच्यं॥ तर्हि
पार्थिवस्य कर्णस्य शब्दसमवायिकारणतापत्तेः पदिंद्रियं पंगुतानर ह्यातिताद्धिंद्रियं बत्त्ते
दुष्णवदिति व्याप्तेः न नेष्वापत्तिरिति वाच्यं॥ वीचिरंतगादिन्यापे नात्र गगनरूपतां नस्यात्॥ अस्म
न्मते तु गगनात्मके ईश्वरस्य विमुखानानुपपत्तिः॥ एतेन वीणामृदंगादिकं नन्विशब्दसमवा
कारणमितिपरास्तं॥ न च शब्दस्य द्रव्यत्वं मास्त्विति वाच्यं॥ संयोगादिगुणकल्पनेगौरवात्॥
न्य तस्मात् गगनस्य ईश्वरात्मकत्वे सति सिद्धे शब्दसमवायिकारणमीश्वर एवेत्याकूतः॥ ब्या न
त्मवत्सौ भावात्॥ आत्मा॥ स च द्विविधः॥ जीवात्मा परमात्मा चेति॥ ॐ सुखोत्पादका
ऽमनोयोगस्य मनस्यपि सत्वात्॥ मनसि सुखोत्पत्तिः स्यादिति समवायसंबंधा
पसंबंधेन यत्र सुखं तत्र तादात्म्यसंबंधेनात्मेति सुखसमवायिकारणतावच्छेद
कतया सिद्धमात्मत्वं जीवेतत्कथमीश्वरे भनिष्पत्तीति चेत् न जीवविशेषसाध्या ॥१९॥

नर

तु वापि पद४

साधारणज्ञानवत्वैरूप्यात्मकस्यापि विवक्षितत्वात्॥ एतेन नेश्वरे दशामद्रव्यत्वापत्तिः॥ अथवाई
श्वरेकेरूपमनिरूपाधिपरदुःखहानेच्छेति तादृशी रूपमात्मत्वमीश्वरे न तु जीवसाधारणमीति
र्गो नाभावादी॥ पद्मासुखसमवायिकारणतावच्छेदकतया सिद्धमात्मत्वं पुञ्जीवे निष्कं तदीश्वरे
पिस्कीकार्यं श्रूयमाणमपत्राप्यात्मप्रयोगादात्मपदशक्यतावच्छेदकं तदेवात्मत्वमिति न
ईश्वरे सुखोत्पत्तिः स्यादिति वाच्यं च धर्मत्वेन सुखत्वेन कार्यकारणभावादीश्वरे धर्म
भावादेव न सुखोत्पत्तिः निसस्य स्वरूपयोग्यस्य फलावश्यंभावनियमइत्यस्याव्या
सोप्रमाणाभावरति॥ इष्टं च श्रुतिवत्वादीश्वरे नित्यसुखे सिद्धे पुरुषजन्यतावच्छेदका दि
सुखत्वव्याप्यजातिरेव स्वीकार्येति तर्हि तेन ज्ञानविशिष्टं सुखं जीवेनेश्वरे इति॥ तत्र पर
मात्मा स एव सर्वज्ञत्वं यः सर्वज्ञः सर्वविदित्यादिश्रुतेः जीवत्वमल्पज्ञत्वं परमात्मानुई श्व
रः एक एव जीवात्मानस्तु सम्मदद्येपोनंताः एवसुखादीनां वैचित्र्यात् बंधमोक्षव्यव
स्थातश्चेति॥ ते च विशेषगुणायोगात् मनोमात्रग्राह्याः अस्मत्त्वात्मनो बुद्ध्यादयो विशे

कृतहानिरकृताभ्यागमप्रसंगाच्च नच जन्मांतरानुभूतमनुपपन्नं स्मरति इति वाच्यं तत्र प्रमाणाभावात्॥ स्तनपानेष्टसाधनस्मरणस्य तु जीवनान्यथानुपपत्त्या तदुत्तरदेशकल्पनात्॥६

ष्पुरुषाः द्रव्याश्रिताः गुणत्वात् रूपादिवत् चक्षुरग्राह्यमात्मेति न वाच्यं इच्छादिमनोमात्रग्राह्यत्वात् गु
न प्रत्यक्षाः किंतु बुद्ध्यादिगुणलिंगानुमेयाः एवं अतः प्रत्यक्षविषयत्वं पक्षिकादिरूपाणामेवो
क्तं जिज्ञासुं प्रत्याह आत्मा वा अरे द्रष्टव्य इत्यादिश्रुतिविरोधात् ते च विभवो विप्रा श्रुतिः तत्राह गो
रः स्थूलोऽहमित्यादिप्रतीत्या शरीरमेव जीवः कुतस्तस्य विभुत्वमिति चेन्न जीवस्य श श्री
त रीरात्मके जन्मांतरानुभूतस्य स्तनपानेष्टसाधनत्वादेरतज्जन्मनि स्मरणं न स्यात्॥
न्यद्दृष्टं अन्यस्स्मरतीति चेन्न तज्जन्मांतरकृतकर्मणामप्युपभोगोऽपि न स्यात्॥ इंद्रियाणा
मात्मत्वे तन्नाशे स्मरणं न स्यात्॥ मनसोऽपि जीवत्वे ज्ञानसुखादीनां प्रत्यक्षं न स्यात्॥ अ स्या
णुत्वान्नाम प्रत्यक्षत्वात्॥ परमात्मापि नित्यो विभुश्च ज्ञानसुखादिमान्॥ ननु विज्ञानमा निर्
नंदं ब्रह्मेति श्रुत्या परमात्मनः ज्ञानसुखादिस्वरूपत्वबोधनात् ज्ञानसुखादिमत्त्वमि
ति चेन्न॥ नित्यं विज्ञानमानंदं ब्रह्मेत्यादिश्रुतावपि मत्वर्थीयाच्प्रत्ययानुरोधेनानंदपदादानं नं
व॥ दवद्बोधनात्॥ यः सर्वज्ञः सर्ववित् इत्यादिश्रुत्यापि ज्ञानवत्त्वबोधनाच्चेति॥ सुखादिज्ञा

॥१७॥

न साधनमिंद्रियं मनः आत्मभिन्नत्वे सति सुखाद्यसमवायिकारणसंयोगाश्रयो वा॥ स्पर्श
रहितमणु मनो वा॥ तच्च प्रत्यात्मनियतत्वादनंतं॥ ननु मनसस्तु विभुः निःस्पर्शद्रव्यत्वाद्व्योम
वदिति चेन्न॥ विभुत्वे चाक्षुषादिज्ञानानां यौगपद्यं स्यात्॥ तच्च न संभवति चाक्षुषरास
नादिज्ञानानामेककालावच्छेदेनोत्पत्तिर्नैयायिकानां स्वानुभवसिद्धं॥ तथाहि दीर्घशष्कु
लीभक्षणे सर्वेंद्रियाणामेकदा विषयसंधाने सत्यपि येनेंद्रियेण सह मनः सं नि
निकर्षस्तादिंद्रियजन्यं ज्ञानमुत्पद्यत इति तच्च विभुत्वे न संभवतीति मनसोऽणुत्वमि
ति॥ किंच मनसो विभुत्वे आत्ममनः संयोगानुपपत्तिः तावेकत्वस्य प्रसंगात्॥ न चात्म द
मनसोर्विभुत्वे तत्कर्मजः संयोगोऽभावस्तु नित्यसंयोगो भविष्यतीति वाच्यं सुषुप्त्यभावप्र ना
संगात्॥ तथाहि मनः त्वक्परिहृत्य पुरीतति गच्छति तदा सुषुप्तिः तच्च विभुत्वेन संभव
तीत्यत्र मनोयोगस्य सत्त्वात् अणुत्वे तु यदा त्वक्परिहृत्य पुरीतति गच्छति तदा सुषु

सि·सा·
॥१८॥

न

त्रिभवितव्यमिति दिक्॥ ननु मनसोऽणुत्वेऽपि व्याद्यणुकादिचतुर्णां परमाणुवन्मनसोऽपि व्यणुकादिक्र
मेण द्रव्यारंभकत्वं स्यादिति चेन्न स्पर्शवत्त्वेनारंभकत्वात् मनसि स्पर्शाभावान्न द्रव्यारं
भकत्वमिति॥ अत्रायं संक्षेपः॥ असमवेतत्वमुत्पन्नत्वेऽपि व्याद्यपरमाणुत्वेऽस्त्वरूपं गत्य
रेणुस्वरूपं गुणमपवादिसिद्धं तदेव मनः॥ नन्वस्ति इन्द्रियान्तरं चेदेवमपि कदाचित्साक्षा
त्कारोऽस्तु संयोगः स्याद्गुणमात्रस्य मनसः स्वादुसंमनः संयोगकाले चक्षुर्मनोयोगस्य सत्त्वादिति चेन्न॥ तन्वज्ञाने
जनने तत्तदनुकूलादृष्टविशेषस्य नियामकस्यानपवादिसिद्धत्वात्॥ एवमपि चक्षुर्मनोयोगकाले ज्ञा
नमात्रजनकत्वे मनोयोगसत्त्वे चाक्षुषत्वाचक्षुर्ज्ञानयोः कथं न यौगपद्यमिति तत्राह दृष्टविशेषोपगृहीतज्ञा
नस्यैवोत्पत्तिरिति अदृष्टविशेषस्य नियामकत्वे॥ तथा च भाष्ये साक्षात्॥ ननु स्पर्शवत्त्वेनारंभकत्वे स्पर्शशून्य
स्यापि तमसः कथं द्व्यणुकादिक्रमेणारंभकत्वमिति चेन्न तमसो द्रव्यत्वाभावात् कृतेनारंभकत्वाभावात्॥ न च नीलं त
मश्चलतीति प्रतीतेः नीलाभावो वालुकत्वं किं तु पदार्थान्तरमिति वाच्यं॥ तस्य भावपदार्थत्वाभावात्॥ तथाहि तमो न गुणात्म
स

सा२

॥१८॥

नि२

र्भसामान्यविशेषवत्त्वं न भवति॥ द्रव्यसमवेतत्वाभावात्॥ नापि समवायात्मा॥ तमो नष्टमिति प्रतीतेस्तमसो नाशानुप
गमात् समवायस्य च नित्यत्वात्॥ न च पृथिव्यादिचतुष्टयत्वं भवति। स्पर्शशून्यत्वात्॥ नाप्याकाशादिष्वपि॥ रूपवत्त्वाभा
वात्॥ तथा च परिशेषात्तेजोऽभावस्तम इति॥ अथ एतत्तमसः तेजोऽभावत्वे तेजोज्ञानं विना तमोज्ञानं न स्यात्॥ अभा
वज्ञाने प्रतियोगिज्ञानस्य हेतुत्वादिति चेन्न॥ तमोज्ञाने तेजोरूपप्रतियोगिज्ञानाङ्गीकारात्॥ न च भित्तिदूरवि
वरवर्त्तिनां योगिनां कथं तमोज्ञानं तत्र तेजोरूपप्रतियोगिज्ञानाभावादिति वाच्यं। तत्र तेषामपि तेजोज्ञानाङ्गी
य६ कारात्॥ तदुक्तमाचार्यैः दूरविवरवर्त्तिनां दिवापि निस्तिमिरावलोकिनेस्साद नक्तं स्मृतालोकादतिनं च तेजो
चि भावस्य घटाद्यभाववद्ग्रहणे आलोकनिरपेक्षस्य चक्षुर्ग्राह्यत्वं न स्यादिति वाच्यं॥ आलोकग्रहे आलोकान
पेक्षत्वदालोकाभावग्रहेऽपि आलोकस्यानपेक्षणात्॥ अभावग्रहे प्रतियोगिनः अनपेक्षणाच्च॥ न च तमसि
नीलरूपवत्त्वप्रतीतिः कथमिति वाच्यं॥ तमो नीलमिति प्रतीतिवत्॥ भ्रान्ता कर्मवत्ताप्रतीतिरपि तेजोऽपसारणो
ओ पाधिका इति रेवेति संक्षेपः॥ अथ गुणा निरूप्यन्ते॥ कर्मभिन्नत्वे सति समवेतजातिमत्त्वं गुणत्वं॥ तत्र गुणत्वं जातिः रूपादिच तामृमि तिप्र२
तुर्विंशतिगुणवृत्तिः अनुगतो धर्मो गुणत्वे जातिसि
द्धिरिति॥ चक्षुर्ग्राह्यो विशेषगुणो रूपं॥ तच्च शुक्लपीतनीलरक्तहरितकपिशचित्र
द्रि॥ अनया ... रूपत्वादि जातिसिद्धिरिति॥

पेवच१

भार

वर्द्धके २

व्याप्य २ व्या १

नेरालसद्बहिर्विशेषः॥ ननु चित्ररूपे प्रमाणाभावः। चित्रपटे शुक्लादिनानारूपैरेव नीलबुद्धिरिति चेन्न॥ तथा हि। किं चित्रपटे नाना
रूप रूपं व्याप्यवृत्तिरव्याप्यवृत्ति वा। नाद्यः शुक्लरूपावच्छेदेन नीलरूपोपलब्धिप्रसंगः। नान्त्यः॥ एकस्यैव व्याप्यवृत्तित्वा
व्याप्यवृत्तित्वविरोधित्वात्॥ व्याप्यवृत्तित्वव्याप्यवृत्तित्वयोर्विरोधाच्च॥ न चावयवानां नानारूपो
अव पलब्धिः अवयवी तु नीरूप एव सद्गृह्यत इति वाच्यम्॥ अवयविनश्चाक्षुषत्वं न स्यात्। चाक्षुषत्वावच्छिन्नं प्रति महत्त्वसमा
नाधिकरणोद्भूतरूपवत्त्वेन हेतुत्वात्। न च चाक्षुषत्वावच्छिन्नं प्रति तादृशरूपवत्समवेतत्वं प्रयोजकं भविष्यतीति गौ वा
रवात् उपनीतनीलपरमाण्वारब्धद्व्यणुकादिप्रसंगस्याभावाच्च॥ तथा च नानावयवगतनानारूपैर
एकं वयविनि चित्ररूपमेकमुत्पद्यते॥ एकं चित्ररूपमित्यनुभवादिति संक्षेपः। तच्च सप्तविधरूपमपि पृथिव्या
मेव। जले तु भास्वरं शुक्लरूपमपाकजं। तेजसि तु भास्वरं शुक्लं रूपं तदप्यपाकजमिति। अन्ये पृथिव्यां
सा चित्रस्पर्शोऽपि स्वीकार्यः। अन्यथा पाकजापाकजस्पर्शवतोरवयवयोरारब्धावयविनो निःस्पर्शत्वे
तस्यास्पार्शनत्वप्रसंगः॥ चित्ररसस्तु न स्वीकार्यः। अवयविनो नीरसत्वेऽपि बाधकाभावात्॥ द्रव्यग्र
हे रसनेन्द्रियस्य सामर्थ्याभावात्॥ रसनाग्राह्यो गुणो रसः। स च मधुरकटुतिक्ताम्ललवणकषाय
भेदात्। षड्विधोऽपि षड्विधोऽपि पृथिव्यामेव॥ जले तु मधुर एव। वस्तुतस्तु मधुरकटुपरमाण्वारब्ध ॥१९॥

मा ५

चे २

द्व्यणुकादिकमेवारब्धावयविनो नीरसत्वात्। रसस्य प्रत्यक्षं न स्यात्॥ परमाणुरसस्याप्रत्यक्षत्वादि
ति चित्ररसः स्वीकार्य इति। एवं चित्रगन्धोऽपि॥ घ्राणग्राह्यो गुणो गन्धः। स च द्विविधः सुर
भिरसुरभिश्च। स च पृथिवीमात्रवृत्तिः। त्वगिन्द्रियग्राह्यो विशेषगुणः स्पर्शः। स च पृथिवी
जलतेजोवायुवृत्तिः। रूपादिचतुष्टयं पाकजमपि पृथिव्यामेव जलादावपाकजमिति। एवं रूपादि ४
उद्भूतस्पर्शत्वं सत्तासाक्षादनुद्भूतमप्रत्यक्षमुद्भूतत्वं जातिविशेषः अनुद्भूतत्वं रूपजातिर्भा
वो वा॥ अत्रेदं बोध्यम् उद्भूतत्वं न जातिः शुक्लत्वादिना जातिसंकरप्रसंगात्॥ तथा हि। शुक्लत्वं
विहायोद्भूतत्वमुद्भूतरूपे उद्भूतत्वं विहाय शुक्लत्वमनुद्भूतशुक्लरूपे उद्भूतत्वं शुक्लत्वं चोद्भूतशु
क्ल इति परस्पराभावसमानाधिकरणधर्मयोरेकत्र समावेशो जातिसंकरस्तु
द्भूतत्वजातिसद्भाव एवोद्भूतत्वं॥ न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यं चाक्षुष
त्वावच्छिन्नं प्रत्येकरूपेण कारणता न स्यात्॥ एवमनुद्भूतत्वस्यापि जातित्वे संकर
दोषः नानैवानुद्भूतत्वमिति तदभावकूट एवोद्भूतत्वमिति॥ अनुद्भूतत्वस्य
ति शुक्लत्वादिव्याप्यत्वे बाधकाभावादिति॥ अत्र वैशेषिकाः पार्थिवपरमाणावेव पाकः न तु घटादौ॥

कारणं ३ रूपं २

तत्रावयविसंवृतावयवेषु वह्निप्रवेशासंभवेन पाकासंभवो द्व्यवयविषु वह्निसंयोगेनावयविनाशे जाते ऽतिशयि
तवेगवत्तया परमाणुपर्यंतविनाशः पुनस्तापेव द्व्यणुकादिक्रमेण तादृशावयविनः समुत्पत्तिस्तत्र पर
माणौ तेजःसंयोगजन्यपाकजं रूपं तस्य तेजःसंयोगोऽसमवायिकारणं द्व्यणुकादौ तु परमाण्वादिरूपासमवा
के यिकारणं तद्भिन्नमिति। तत्रैश्वरकृतिः निमित्तकारणं॥ अत एव तदानीं मध्ये कैस्तैरसंभवादीश्वरसिद्धिरि[illegible]॥
तदपरे न क्षमन्ते तथा हि वह्निरतिशयितवेगवशादतिसूक्ष्मरंध्रेष्ववयविषु सूक्ष्मावयवेषु प्रविष्टस्तत्र विष्टे
निविडेष्ववयवेष्वपि पाकः संभवेत्सेवेति द्व्यणुकादिष्ववयविषु पाके बाधकाभावः। अनंतावयवध्वंसप्रा
गभावकल्पने गौरवात्॥ सोऽयं पक्षः प्रमाणसिद्धो नाङ्गीति संक्षेपः॥ अथ द्व्यणुकादिविनाशमारभ्य
कतिभिः क्षणैः द्व्यणुकमुत्पद्य पुनः रूपादिमद्भवतीति चेत्॥ अत्रोच्यते॥ यदा परमाण्वंतरे कर्म तदा
पंचक्षणाः। तथा हि एकस्मिन् परमाणौ कर्म ततः परमाणुद्वयविभागः ततो द्व्यणुकारंभकसंयो
गनाशः परमाण्वंतरे कर्म जातीयेकः कालः ततो द्व्यणुकनाशः परमाण्वंतरकर्मजोऽपि विभाग इत्येकः
कालः ततो द्व्यणुकनाशो द्वितीयक्षणे श्यामादिरूपनाशः विभागात्पूर्वसंयोगनाशश्चेत्येकः कालः॥ द
कालः। ततस्तृतीयक्षणे द्व्यणुकारंभकसंयोगः परमाणौ [illegible] रूपोत्पत्तिरित्येकः कालः॥ च

वा न्य द्व्य वे

२१ ॥२०॥

नाश

तुर्थक्षणे द्व्यणुकोत्पत्तिः पंचमक्षणे रक्तरूपोत्पत्तिरिति पंचक्षणाः॥ अथ द्व्यणुकध्वंससमकालं परमा
ण्वंतरे यदि कर्म तदा षट्क्षणाः। तथा हि परमाणौ कर्म ततो परमाण्वंतरविभागश्च ततो द्व्यणु
कारंभकसंयोगनाशः ततो द्व्यणुकनाशः परमाण्वंतरे कर्म चेत्येकः कालः ततो द्व्यणुकनाशद्वितीय
क्षणे श्यामरूपनाशः परमाण्वंतरकर्मजश्च विभागः ततो तृतीयक्षणे परमाणौ रक्तरूपोत्पत्तिः परमाण्वंत
रेण पूर्वसंयोगनाशश्च॥ चतुर्थक्षणे द्व्यणुकारंभकसंयोगः पंचमक्षणे द्व्यणुकोत्पत्तिः षष्ठक्षणे रक्तरू
यदि पोत्पत्तिरिति षट्क्षणाः॥ अथ श्यामरूपनाशक्षणे परमाण्वंतरे कर्म तदा सप्तक्षणाः। परमाणौ क्रि
पर पो वि या ततः परमाण्वंतरेण विभागः ततो द्व्यणुकारंभकसंयोगनाशः ततो द्व्यणुकनाशः ततो द्व्यणुकनाश त ग
द्वितीयक्षणे श्यामादिरूपनाशः परमाण्वंतरे कर्म च॥ तृतीयक्षणे परमाणौ रक्तरूपोत्पत्तिः परमाण्वं
तरकर्मजविभागः चतुर्थक्षणे परमाण्वंतरेण पूर्वसंयोगनाशः पंचमक्षणे द्व्यणुकारंभकसंयोगः म
षष्ठक्षणे द्व्यणुकोत्पत्तिः सप्तमक्षणे रक्तरूपोत्पत्तिरिति सप्तक्षणाः॥ अथ यदि रक्तरूपोत्पत्तिसमकाले
परमाण्वंतरे कर्म तदा॥ अष्टक्षणाः तथा हि। परमाणौ कर्म ततः परमाण्वंतरेण विभागः ततः द्व्यणुक

क्षणो कर्मजः

रंभकसंयोगनाशः ततो घणुकनाशः ततो घणुकनाशाद्द्वितीयक्षणे परमाणौ श्यामादिरूपनाशः तृतीयक्षणे परमाणौ रक्त
रूपोत्पत्तिः परमाणौ वेगेरकर्म वा । चतुर्थो विभागः पंचमक्षणे परमाणौ तत्पूर्वसंयोगनाशः षष्ठक्षणे घ घर
णुकारंभकसंयोगः सप्तमक्षणे घणुकोत्पत्तिः ॥ अष्टमक्षणे रक्तरूपोत्पत्तिरिति अष्टक्षणा ॥ अ
थ नवक्षणा । अग्निसंयोगात्परमाणुद्वये कर्म ततः परमाणुद्वयविभागस्ततो घणुकारंभकसं
योगनाशस्ततो घणुकनाशस्ततो घणुकनाशाद्द्वितीयक्षणे परमाणौ श्यामादिरूपनाशः तृ
तीये रक्तोत्पत्ति कर्मनाशश्च चतुर्थे द्रव्यारंभानुगुणं कर्म पंचमे विभागः षष्ठे पूर्वसंयोगनाशः ॥ यप
सप्तमे घणुकारंभकसंयोगः अष्टमे घणुकोत्पत्तिः नवमे रक्तोत्पत्तिरिति नवक्षणा ॥ अथ पाद्द्रव्यारं
क्षय४ भंकसंयोगविनाशविशिष्टकालमपेक्ष्य विभागजविभागे कारक्ष्णो दशक्षणा ॥ तथाहि अग्नि गं
संयोगात्परमाणौ कर्म ततः परमाण्वंतरेण विभागस्ततो घणुकारंभकसंयोगनाशस्ततो घ
जविभाग णुकनाशे परमाण्वावकाशविभागरूपो विभागः अथ एकः कालस्ततो घणुकनाशाद्द्वितीयक्षणे प
रमाणौ श्यामादिरूपनाशः परमाण्वाकाशसंयोगनाशश्च एकः कालः ततः तृतीयक्षणे परमा

कार ॥२१॥

णौ रक्तरूपोत्पत्तिः परमाण्वन्तरदेशसंयोगश्च एकः कालः चतुर्थे वह्निनोदनजन्यपरमाणौ कर्मनाशः पंचमे अदृष्टवद
त्मसंयोगवशात् घणुकारंभकानुगुणं कर्म षष्ठे परमाणौ पूर्वदेशविभागः सप्तमे परमाणौ पूर्वदेशसंयो
गनाशः अष्टमे परमाणौ घणुकारंभकसंयोगः नवमे घणुकोत्पत्तिः दशमे रक्तरूपोत्पत्तिरिति दशक्षणा
अथ पाद्घणुकनाशविशिष्टकालमपेक्ष्य विभागजविभागस्तौ एकादश ॥ तथाहि वह्निसंयोगात्पर
माणौ कर्म ततः परमाणुद्वयविभागस्ततो घणुकारंभकपरमाणुद्वयसंयोगनाशस्ततो घणुकना
शः ततो घणुकनाशाद्द्वितीयक्षणे परमाणौ श्यामादिरूपनाशः परमाण्वाकाशविभागजविभागश्च ए
परमाणौ रक्तरूपोत्पत्तिः ८ कः कालः तृतीयक्षणे परमाण्वाकाशसंयोगनाशश्च चतुर्थे क्षणे परमाण्वन्तरदेशसंयोगः
पंचमक्षणे परमाणुकर्मनाशः षष्ठक्षणे अदृष्टवदात्मसंयोगात् द्रव्यारंभकानुगुणा क्रिया । सप्तमे क्षणे वि
नाशः भागः । अष्टमे क्षणे पूर्वसंयोगनाशः नवमे क्षणे घणुकारंभकसंयोगः दशमक्षणे घणुकोत्प
त्तिः एकादशक्षणे रूपोत्पत्तिरिति एकादशक्षणा न चैवं पाकप्रक्रियायामेकादशक्षणापि पाचपरमाणौ श्या
मादिरूप रक्ते दृश्य

अन्यस्माद् ८ वै २

नाशकत्तोर्कस्येति सत्येव नाशकत्वं कालं नानुगुणं कर्मान्वितितस्य कर्मवति कर्मानुसन्धेनिर्गुणे कर्मानुसृते ज्ञानाथा
च वह्निसंयोगस्य नाशकत्वे तत्कर्म तद्गुणनाशेसाक्षिगुणान्तरानुत्पत्तेस्ततिद्व्यार नानुगुणताक्रियेति॥ न च रूपादिरूप
नाशकत्तोर्कस्येति: कुतो नेति वाच्यं॥ कथं तदेकत्वे रूप नाशस्य कारणत्वादिति॥ अथ कस्मादग्निसंयोगरूप
रूपनाशादिकमेता स्वगुणको दिनाश॥ अग्निसंयोगासमवायिकत्वे रूपे संभवति इति नाशकस्य नोपादकत्वं॥ अ
ग्निसंयोगस्यतावत्कालं नश्यस्थिरत्वादिति दृष्टादकस्य नाशकहेतुपरमाणौ रूपानुसन्धारूपनाशोत्पत्तिर्न तदुत्तरम
ग्निसंयोगनाशोत्पत्तिपरमाणौ बहुकालं नीरूपत्वापत्तेः॥ नाशकस्याहार्दकहेतुरूपात्परूपनाशकरत्वं रूपोत्प
रकाग्निसंयोगनाशोत्तरक्षणे तत्रैव स्यादिति तात्पर्य॥ एतन्नाशकधारणाकारणसंख्यासु॥ वैकालादिपराद्वैत॥
तत्रैकत्वं नित्यपरमाण्वादिगतं नित्य॥ अनित्यं च्यणुकादिगतं स्वकंनित्य॥ द्वित्वादिकं सर्वमपेक्षाबुद्धिजन्यम
नित्य॥ यद्यपि प्रत्येकं सन्नमत्वैकत्वं नमपि द्वित्वादिकं न बिनादिबुद्धिं न जन्यते एकोन द्वाविति प्रसपात्॥
तथापि पर्याप्त्यारूपसंवन्धेन वर्तमानस्य द्वित्वादिबुद्धिजन्यत्वं पर्याप्तिस्तु नैकस्मिन्नर्थे द्वित्वादेः किंतु द्वित्वस्पद्व
योः त्रित्वस्य त्रिषु पर्याप्तिः एवंपरार्ध्यपर्यन्तं बोध्यं॥ द्वित्वादीनां पराद्वपर्यन्तानां व्यासज्यवृत्तित्वेनियमात्॥ अप

स्थिरवर्त्त ति २

११२२

खी ४ द्दमौ २ द्वित्वं ५

स्यात्बुद्धिनाशाद्बुद्धिनाशात्तथापि द्वित्वमपमपेक्षेकोऽयमेकोऽयमपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिस्ततो द्वित्वं द्वित्वनि
र्विकल्पकरूपविशेषणताज्ञानं ततो द्वावितिद्वित्वप्रत्यक्षरूपविशिष्टबुद्धिस्तत्कालेऽपेक्षाबुद्धेर्विनाशस्ततो द्वित्व
नाशरति॥ अपेक्षाबुद्धेःस्थिरत्वे गुणत्वं स्यादिति॥ न तु पोषविनुर्विरोधगुणत्वं नोत्पत्तौ स्यान्नेत्यनेन नाशकत्वोत्पन्नक
स्वा ४ ममपेक्षाबुद्धेर्विनाशे तत्र वस्यापि शोकं किं तु द्वित्वज्ञानानस्यात्विशेषं नोविषय्यमितिचेन्न द्वित्वप्रत्यक्षस्यान्यथानुपपत्त्यापेक्षा प४
स्प५ स्याद्बुद्धेःस्थितायाः स्वीकारादित्यभ्युपगमात्॥ नन्वपेक्षाद्वित्वोत्पत्तिनिर्विकल्पकालेऽपेक्षाबुद्धिनाशो द्वित्वप्रत्यक्षे न
स्यात्॥ द्वित्वोत्पत्तिप्रत्यपेक्षाबुद्धेर्हेतुत्वात्कारणत्वात्॥ द्वित्वप्रत्यक्षकाले हि अपेक्षाबुद्धेर्विनाशः अपेक्षाबुद्धिना
शस्य द्वित्वनाशं प्रतिहेतुत्वेऽस्तु तत्रतथा सर्वदापि द्वित्वप्रत्यक्षापपक्षं च स्यात्॥ अ प्रतियोगिज्ञानात्प्रत्यक्षता: संख्या
नगुणत्वात् किंतु परार्ध्यंत तद्गुणत्वादपि संख्यात्वं प्रतीतेः नचैवं प्रत्येकान्तिः॥ बाधकाभावे नामान्तरं प्रयोगात्॥ नचैकत्व
व एकत्वसमवायप्रत्यासत्त्या प्रतीतिरिति वाच्यं पदप्रतीपावेकार्थसमवायप्रत्यासत्त्या एकत्वादेकार्थसम
सा वायप्रत्यासत्त्या द्वित्वप्रत्यापत्तेरिति चेत्॥ मानव्यवहारासाधारणं कारणं परिमाणं। तदणुदीर्घह्र नर

सि॰ सत॰ ॥२३॥

क २ कं ४

स च नित्यश्चतुर्विधं।। तन्नित्यगतं नित्यमनित्यगतमनित्यं।। तदपि त्रिविधं।। संख्याजन्यं परिमाणजन्यं प्रचयजन्यं च।। द्व्यणुके त्र्यणुके च परि-
माणं संख्याजन्यं।। घटादिपरिमाणं तत्कपालादिपरिमाणजन्यं।। परमाणुद्वित्वसंख्याद्व्यणुकपरिमाणं ताश्च समवा-
भाजकोपाधिर्वंउदाहरणत्वं वह्निव्याप्यधूमवानयमितिन्यायपठितशब्दत्वव्याप्यावयवविभाजकोपाधिर्वं
रा उपनयत्वंवह्निव्याप्यधूमवत्त्वाद्वह्निमानितिन्यायपठितशब्दत्वव्याप्यावयवविभाजकोपाधिर्वंनिगमनत्वं
अवयवत्वंप्रतिज्ञादिपंचान्यतमत्वमितिसंक्षेपः॥ व्याख्यातमनुमानं॥ अथोपमानंनिरूप्यते॥ तत्रोप
पमितिकरणमुपमानं॥ उपमितित्वंजातिविशेषः॥ उपमितौमीतिप्रतीतेर्बाधकं

वं म२ स्प५

॥४२॥

का७

उपमितौमीतिप्रतीतेर्बाध्यकंविनाजातिविषयत्वात्॥ तत्रसादृश्यज्ञानसहकृतातिदेशवाक्यार्थज्ञानं ततगोसादृश्यविशि
शिष्टपिण्डदर्शनंतदेवोपमितिकरणं॥ तत्स्मरणमवान्तरव्यापारः उपमितिफलंतथाहि॥ अगृहीतगवयपदशक्ति
कोगवयं॥ अज्ञजानन्नपिगवयपदंयत्रकुत्रचिदृशाउपमितिजानातिपत्रपदंतत्सप्रवृत्तिनिमित्तिकं साधुपदत्वा
दितिज्ञात्वानागरिकः पुरुषः कंचिदारण्यकंपुरुषंपृच्छति किदृशोगवयपदमिति॥ ततस्तेनगोसदृशोगवयपदवाच्यस्सा पो
कारकमतिदेशवाक्यमुक्तं[redacted]: ततोवनमनुसरन्गोसदृशंपिण्डंपश्यतितदागोसदृशस्यानुभवोजातः
सएवोपमितिकरणंततोगोसदृशोगवयपदवाच्यइत्यतिदेशवाक्यार्थस्मरणंजायतेतदेवव्यापारः ततोगवयोगवप
पदवाच्यइत्युपमितिरुपद्यतेसैवोपमितिरिति [illegible]मते॥ मीमांसकमतेतुगवयोगवयपदप्रवृत्तिनिमित्तवानित्या
कारिकोपमितिरिति॥ यत्तुपशुगवयपदवाच्यइत्याकारिकोपमितिरितिनव्या॥ अन्येतुगवयपदशक्तिग्रहोनस्यादितिदूषणंपुनर
६ रथ्येपायेपच्यमर्थकरणंकथंतादृश्युपमितिरुत्पद्यते॥ यथा॥ शिष्यपराकीडंशीयापृथिवीगरुदप्रतिरूपेत्रजलादिवैधर्म्यगुणा
वतीपृथिवीतिगुरुणोक्ते नजलादिवैधर्म्यगुणावतीपृथिवीत्यनुभवति॥ सचानुभवःकरणं॥ तज्जन्यतद्वाक्यार्थस्मरणं
व्यापारस्तादृशंतरंपृथिवीपृथिवीपदवाच्येत्युपमितिरुत्पद्यतइत्यादिसुधीभिर्विभाव्यबोध्यमितिसंक्षेपः॥ विस्तरस्तुअस्मत्कृतासि
द्धांतमंजरीटिप्पण्यांद्रष्टव्यइति॥ अथशब्दोनिरूप्यते॥ नत्रशाब्दप्रमितिकरणंशब्दः शाब्दत्वंजातिविशेषः॥ शब्दात्प्र
पे त्येमीत्यनुभवगतप्रतीतेर्बाध्यकंविनाजातिविषयत्वात्॥ तस्यशाब्दस्यज्ञानंकरणं ननुशोपमानःशब्दःकरणं॥ मौनि
श्लोकादौशब्दाभावेपिशाब्दबोधोत्पादात्॥

दुराज्ञानस्य [illegible]दिसंभवात्॥ अतीतानागतशाब्दस्थले शाब्दाभावेपि तद्विषयकज्ञानाच्छाब्दबोधोदयाच्च शाब्दस्य प्रमितिकरणत्वं
आश्चिनमतानित्रापरा॥ वृत्त्या पदजन्यपदार्थोपस्थितिर्व्यापारः वृत्तिश्च शक्तिलक्षणान्यतरा॥ तेन समवायेन घटादिपदादाकाशो
पस्थितौ नाकाशस्य शाब्दबोधः पदजन्यत्वपदोपादानात् प्रत्यक्षादिना पदार्थोपस्थितौ वपि न शाब्दबोधः ननु शाब्दो
न प्रमाणं प्रमित्यजनकत्वादिति चेन्न॥ शाब्दो न प्रमाणमिति वाक्यं यदि न प्रमाणं तदा शाब्दस्य प्रमाणरूपविषय
बाधात्॥ शाब्दस्य प्रमाणत्वासिद्धमेवा यदीदं वाक्यं प्रमाणं तदा तु शाब्दस्य सुतरां प्रमाणत्वं सिद्धमेव वाक्यस्य
कृ शाब्दरूपत्वादिति अत्र शाब्दो न प्रमाणमिति विपं नै[illegible]मः किंतु शाब्दो न प्रमितिजनकः पदार्थसंसर्गस्य अनुमाना
देवासिद्धेः। न पाहि॥ गामानयेत्यादिपदानि ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिपदानि वा॥ तात्पर्यसंसर्गकविषय
कमिथःसंसर्गज्ञानपूर्वकाणि॥ आकांक्षायोग्यतासत्तिमत्पदकदंबत्वात्॥ घटमानयेत्यादिपदकदंबवत्॥ यद्वा॥
घटकर्मत्वानयनादयः पदार्थास्तात्पर्यविषयसंसर्गवंतः आकांक्षायोग्यतासत्तिमत्पदकदंबत्वात्स्मारितत्वात्
गोकर्मत्वानयनादिपदार्थवदित्यनुमानादेव संसर्गसिद्धौ कृतं शाब्दस्य प्रमाणांतरकल्पनयेति चेन्न॥ व्याप्ति
शा ज्ञानादिविरहितोपि शाब्दादर्थप्रत्ययात्॥ अत एव न साक्षात्कृतं नानुमिनोमि नोपमिनोमि अपि तु शब्दादवगत
गतमिति प्रतीतेरिति चैतन्यस्य शाब्दादर्थप्रत्ययादिति विस्तरस्तु तस्मिन्नकतमगदीटिप्पणादेवानुसंधेयः॥ अथ पद
रूपपदजन्यपदार्थोपस्थितिः शाब्दबोधे व्यापारः तत्र वृत्तिपदेन शक्तिलक्षणान्यतरसंबंधः॥ तत्र शक्तिः कास्ति
चेत्॥ उच्यते। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छा। सैव पदेन सह

पदार्थसंबंधस्तच्चाधुनिकचैत्रादिसंकेतेष्वप्यस्तीति द्वादशाहे पिता नाम कुर्यादितीश्वरेच्छायास्तत्रापि सत्त्वात्॥ स च शक्ति
ग्रहो धातुकृतिप्रत्ययानां व्याकरणात्॥ यथा चैत्रः पचतीत्यादावाख्यातस्य वैयाकरणैः कर्तरि शक्तिरुच्यते पचति चैत्र
स्तत्र पाककर्ता चैत्र इति बोधः॥ चैत्रकर्तृकः पाकः तंदुलकर्मकः पाकः चैत्रः पचतीति वा बोधः नैयायिकानां मते कृतिमत्सापेक्ष्य
पाकृतित्वस्य शक्यतावच्छेदके लाघवमिति कृतौ शक्तिस्तत्र पाकानुकूलकृतिमांश्चैत्र इति बोधः॥ क्वचिदुपमाना
च्छक्तिग्रहः स चोल्लेख[illegible]कचित्कोशादपपा अमरा निर्जरा देवा इत्यादिना अमरादिपदानां देवत्वविशिष्टे शक्तिग्रहः
क्वचिद्व्यवहाराद्यथा॥ घटमानयेति शब्दाद्घटानयनरूपकार्यमवधारयति ततस्तत्र घटं नय पटमानयेत्यादिवाक्य
दावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिमवधारयति ननु केवलघटादौ अप्रथमकल्पना गुरुत्वात्॥
शाब्दानां तथा च घटोस्तीत्यादौ कार्यताबोधकलिङादिपदसमभिव्याहारो नास्ति तत्र वाक्यान्न शाब्दबोधः॥ कार्यताबोधकलिङादिपदानां सामर्थ्या तस्य
व्यवहारत्वात्॥ घटोस्तीत्यादिवाक्या द्व्यवहारस्संसर्गाद्यभावात्॥ अत्र वदंति॥ घटादिपदानां प्रथमतः कार्यान्वितघटादौ शक्तत्व
प धारितेपि पश्चादावापोद्वापाभ्यां घटादिपदानां घटत्वादिविशिष्टे शक्तिमवधारयति॥ गौरवेणात्र कार्यान्वितत्वांशपरित्या
गात्॥ नहि आवापोद्वापाभ्यां प्रथमतः एव घटादिपदानां घटत्वादिविशिष्टे शक्तिग्रहोस्तु लाघवादिति चेन्न॥ उच्यते॥ एवं
घटोस्तीत्यादौ कार्यतावाचकपदाभावेपि शाब्दबोधो भवत्येव॥ एवं च पुत्रस्ते जातः कन्या ते गर्भिणीत्यादौ शाब्दबोधः॥ स्वर
पयदितिक पमन्य वामुखप्रसादमालिन्याभ्यां सुखदुःखेऽनुमीय तत्कारणीभूतशाब्दबोधानुमानं न जितिमि॥ अत्र प्रथम
प्रवृत्ता कार्यान्वितघटादौ शक्तिकल्पनाबाधेपि तु चरमप्रवृत्तापचरमात्रे शक्तिकल्पनाक पंसमर्थाप्रथमप्रवृत्ता पाकल्प

ल.सि.सं.॥
॥४४॥

श्री — वे२ ५४

त्याबलवत्वादितिचेन्न॥ प्रथमप्रवृत्त्यापाः कल्पनायाः बलवत्वासिद्धेः। चंद्रतारकादौ प्रथमतः स्वल्पत्वग्रहेपि शास्त्रान्महत्त्वावग
तेस्वल्पत्वप्रतीतेर्बाध्यत्वात्॥ लाघवसहायप्रथमचरमकल्पनाया बलवत्वाच्चेति संक्षेपः। क्वचिद्वाक्यशेषाच्छक्तिग्रहः। यथा यव
यवमयश्चरुर्भवतीत्यत्र यवपदस्यार्याणां दीर्घशूकविशिष्टे प्रयोगः म्लेच्छानां तु कंगौ प्रयोगः। तत्र यत्रान्या ओ
षधयो म्लायंते अथैते मोदमाना इवोत्तिष्ठंतीति वसंते सर्वसस्यानां जायते पत्रशातनं मोदमानाश्च तिष्ठंति यवाः कणिशश
शालिन इति वाक्यशेषात् यवपदस्य दीर्घशूकविशिष्टे शक्तिग्रहः। कंगौ तु शक्तिभ्रम इति। सैंधवपदादिना नानार्थस्थले तु
विनिगमकाभावान्नानाशक्तिकल्पनं। क्वचिद्विवरणादपि शक्तिग्रहः। यथा पचतीत्यस्य पाकं करोतीति विवरणात् कृतौ करोति नाख्या
आ० ख्यातस्य विवरणादपि आख्यातस्य कृतौ शक्तिरिति॥ अत्र विवरणं तु समानार्थकशब्देन तदर्थकथनं॥ यथा पचतीत्यत्र
कृत्यर्थककृधातुनाख्यातार्थस्य कृतेर्विवरणं। क्वचित्प्रसिद्धपदसान्निध्याच्छक्तिग्रहः। यथा इह सहकारतरौ मधुरं पिको रौती म६
त्यादौ प्रसिद्धपदसान्निध्यात् पिकपदशक्तिग्रह इति॥ संग्रहश्च॥ शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च। वा
क्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ इति॥ अथ पदशक्तिर्गवादिपदानां गोत्वविशिष्टे शक्तिः सा च गोत्वसत्वे
गोत्वविशिष्टव्यक्तिप्रतीतेरेकत्र गवि शक्तिग्रहे अन्यगोबोधानुपपत्तिरिति चेन्न॥ गोत्वसामान्यलक्षणप्रत्यासत्त्या सकलगवामुपस्थि
तौ सर्वत्र गवि शक्तिग्रहादिति॥ अथ जातावेव शक्तिर्न तु व्यक्तौ आनंत्यव्यभिचाराभ्यां न च व्यक्तिभानानुपपत्तिः॥ जातिव्यक्त्योरेकवित्तिवेद्यत्वात् व्यक्तिबोधकत्वमिति
जा नानात्वशक्त्यास्य बोधेपि लक्षणया पदबोध्यस्यादिति वाच्यं॥ जातिशक्तिपदस्य जातिविशिष्टव्यक्तिबोधकत्वादिति चेन्न॥ गोत्वमस्तीत्यत्रापि
गोत्वविशिष्टबोधापत्तेः। किंच यदि गोत्वं शक्यमिति शक्तिग्रहसाधकं तर्हि गोत्वप्रकारकशक्तिग्रहाद्गोत्वप्रकारकपदार्थस्मरण॥

लमा२ — श२

॥राम॥
॥४४॥

म२ रुप२

गोत्वप्रकारकशाब्दबोध इति नियमात्॥
कथं वा गोत्वप्रकारकशाब्दबोधः॥ यत्प्रकारकशक्तिग्रहस्तत्प्रकारकपदार्थोपस्थितिस्तत्प्रकारकशाब्दबोधः॥ गोत्वेवशे गौरवमिति॥
गोत्वस्य शक्यतावच्छेदके गौरवाच्च॥ गोत्वं लोहितत्वेतरासमवेतत्वे सति सकलगोसमवेतत्वं भेदस्यान्वयस्य शक्यतादिति वाच्यं॥
गोत्वविशिष्टे शक्तिरिति न चैवं गोत्वस्य कुत्रगोत्वं भेदप्रत्ययो न स्यात्॥ अभेदस्यान्वयस्य शक्यसंबंधः यथा गंगा
गोशक्तपदस्य गवान्वयबोधकत्वात्॥ यदाकीर्णं तु न गवान्वयत्वमिति प्रसंगान्नाम्नादिति लक्षणा तु शक्यसंबंधः यथा गंगा
यां घोष इत्यत्र गंगापदशक्यप्रवाहसंबंधस्तीरे इति। अत्र गंगापदस्य लक्षणया तीरबोधस्तत्र शक्यार्थप्रवाह
संबंधः तीरस्य हि त्यागः शक्यस्य तदुच्चारणं शाब्दबोध इति सा च लक्षणा पुनस्त्रिविधा॥ जहत्स्वार्था अजहत्स्वार्था जहदजहत्स्वार्था
लक्षणा चेति॥ तत्र जहत्स्वार्था गंगायां घोष इत्यत्र स्वार्थस्य प्रवाहस्य परित्यागः॥ अजहत्स्वार्था तु काकेभ्यो दधि रक्ष्यतामि
त्यत्र स्वार्थास्य काकस्यापि विवेशात्॥ जहदजहत्स्वार्था तु तत्त्वमस्यादौ तत्पदार्थ लक्षितं
काक त्यत्र दध्युपघातकेनोक्तिकं तत्र दध्युपघातके काकस्यापि विवेशात्॥ जहदजहत्स्वार्था तु सोयं देवदत्त इत्यादौ तत्काल
रि पदार्थयोः सर्वांशलक्षणा क्वचिदेकरूपोपाधिः परित्यागे न चेतन्यमात्रविशेषेण जहदजहत्स्वार्थलक्षणा॥ भेदांशं त्यक्त्वा देवदत्तादिरूपलक्षकशक्यसंबंधो
रतर शांचैतत्कालदेशादिपरित्यागेन देवदत्तमात्रावशेषात्॥ जहदजहत्स्वार्थत्वं॥ एवं गौणीभूतापि लक्षणा॥ भेदांशस्याद्धपरित्यागे कृतिश्च तद्भेदरूपेण
गौणी यथा गौर्वाहीकः तद्भिन्ना शुद्धा यथा आयुर्घृतमिति॥ अत्र आयुःपदं आयुर्जनके लाक्षणिकमिति॥ यत्र द्वौ रेफौ यत्र तत्र भ्रमरपदं लक्षणा॥
सं वंशोत्तमौ रेफौ बुध्यते भ्रमरपदस्य संबंधो भ्रमरत्वविशिष्टे बुध्यत इति तत्र लक्षितलक्षणा॥ अनादिप्रयोगानुसारिणी लक्षणा
निरूढलक्षणा॥ यथा कुशलः। पठत्वादिपूर्वपदस्य कुशपदस्य कुशरूपवस्तु लाक्षणिकं॥ सा च लक्षणा निष्कावच्छिन्नत्वात् प्राप्तिबंधादिति वाक्येन लक्षणासंबंधः
निरूढलक्षणा॥ यथा कुशलः पठत्यत्र कुशपदस्य कुशरूपवस्तु लाक्षणिकं तत्तः पुनरभेदेन पदार्थद्वयान्वयबोधस्तथा च राजसंबं
धिनापुरुषे राजपुरुषपदं राजपदं राजसंबंधिलाक्षणिकं ततः पुनरभेदेन पदार्थयोस्तथा भावात्॥ अत्र राजपदलक्षणा विना
ध्यमित्रपुरुषपदमिति बोधः न वानेकेर्मधारयापत्तिरिति वाच्यं॥ विग्रहदशायां समानार्थत्वाभावात्॥ अत्र राजपदलक्षणा विना

प२२

॥दे॰ सि॰॥
॥४५॥

पे३ भन१ मानयेप न४

राजपदार्थस्य न पुरुषपदार्थेन साक्षादन्वयबोधः ॥ निपातातिरिक्तनामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात् ॥ किंतु राजपुरुषइ
त्यत्र भेदेन साक्षादन्वयबोधो न स्यात् ॥ न च राजपुरुष इति समासस्य वाक्यस्य राजसंबन्धिविशिष्टपुरुषे शक्तिरेवोच्यतामिति
वाच्यं ॥ राजपदलक्षणैवोपपत्तौ वाक्यशक्तौ प्रमाणाभावात् ॥ एवं वाक्ये न लक्षणा शक्त्यभावे लक्षणायाः अयोगात् ॥ कुत्री
हौ चित्रगुरित्यादौ तु गोपदं चित्रगोस्वामिलक्षकं चित्रपदं तात्पर्यग्राहकमित्यन्यपदे लक्षणा तु पूर्वपदे विभक्त्यर्थप्रकारकबोध
न्वयानुरोधात् ॥ अयमर्थः प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति नियमस्य पाचचित्रगुरित्यादौ गोपदप्रकृतीकृत्य बाधप्रसङ्गात् योजा वे
जानसादर्थकर्मत्वान्वयस्तु गोपदलक्षणायां सत्यां न गोपदार्थस्यैव प्रकृत्यर्थत्वात् ॥ चित्रपदस्य प्रकृतित्वाभावाच्च ॥ अन्तर्वर्गभीरा
यां नद्यां घोषस्तत्र नदीपदं गंभीरानदीतीरलक्षकं ॥ गंभीरपदं तात्पर्यग्राहकं प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामित्युत्सर्गा
त् ॥ उपकुंभमित्यत्र कुंभसंबंधिसमीपे कुंभपदस्य लक्षणा ॥ अर्द्धपिप्पलीत्यत्र पिप्पलीसंबंध्यर्द्धे पिप्पलीपदलक्षणा पूर्वप रूप
दप्रधानत्वेनान्वयबोधात् ॥ धवखदिरौ छिंदीत्यादौ धवेतरेतरद्वंद्वे तु न लक्षणा धवखदिरेत्यादौ द्विवचनान्वयात् ॥ नन्वत्र च
धवसहितखदिरे लक्षणैवेति वाच्यं ॥ साहित्याभावेपि गोत्वाश्वत्वे द्वंद्वदर्शनात् ॥ पाणिपादमित्यादौ समाहारद्वंद्वे तु पाणिपदं पाणित्र
तियोगिकं लक्षयति ॥ पादपदं पादप्रतियोगिकं पादसमाहारं लक्षयति ॥ न च पाणिपादमित्यादौ पेक्षाबुद्धिविशेषरूपसमा
हारस्य बाधेन कर्मत्वासंभव इति वाच्यं ॥ परंपरया समाहारे बाधेन कर्मत्वान्वयात् समाहाराश्रयेवाद न कर्मत्वान्वयो ॥ अत्र द्वंद्वश्च
प्राणितूर्यसेनाङ्गानामित्यनेन सूत्रेण समाहारसंज्ञा बोध्या ॥ अहिनकुलमित्यत्राहिनकुलश्वावगम्यते प्रत्येकमेकत्वान्वयः स्त्रीक्लिप
नेतयोः समाहारस्य बाधितत्वात् ॥ अत्र संहारसंज्ञा तु येषां च विरोधः शाश्वतिक इत्यनेन ॥ एवमष्टकमित्यादावपि
बोध्यं समाहारसंज्ञापनं नपुंसकत्वमेकवचनं [illegible]

मा स पू१

॥राम॥
॥४५॥

स्व१ न्व

त्यस्य च रूपाणामेकशेष एकविभक्तावित्यनेन सूत्रेण ॥ पिता मात्रार्थत्वेनेन श्वशुरः श्वश्र्वार्थत्वेनेनान्वयपाक्रमेकशेषे
घटाद्यसादौ तु घटपदं न घटसमुदायलक्षणिकं ॥ घटत्वेनान्यघटोपस्थितिसंभवादिति ॥ पितरौ रत्र तु पितृपदे ज
नकदंपत्योर्लक्षणा ॥ श्वशुरावित्यत्र पुरुषस्त्रीजनकदंपत्योर्लक्षणा ॥ नीलोत्पलमित्यादिकर्मधारये तु नीलाभिन्नमु
त्पलबोधस्तत्राभेदस्यान्वयविधया नानोपपत्तेः न तत्र शक्तिर्न वा लक्षणा ॥ अत एव निषादस्थपतिं याजयेदित्यत्र क
र्मधारयः न तत्पुरुषः ॥ निषादपदार्थस्य स्थपतिपदार्थयोर्भेदेनान्वयो व्युत्पत्तेः ॥ नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात् ॥
अन्यथौदनः पचतीत्यत्रौदनपाकयोः कर्मत्वात्संसर्गेणान्वयबोधः स्यादिति ॥ निषादपदस्य निषादसंबंधिनि लक्ष
णाकल्पने गौरवात् ॥ कर्मधारये तु निषादाभिन्नोपः स्थपतौ निषादे श्वरसास्य याजनमिति शब्दबोध्यस्य शीघ्र कल्पना
त्वोपमानत्वात् ॥ न च तत्पुरुषे निषादानाधीनस्य त्रैवर्णिकस्य याजनोपपुल्ले वेदाध्ययनैविरहात् चवार्भातिकर्मधारये
तु निषादस्य संकरजातीयस्य वेदाध्ययनाधिकाराभावाच्चाजनं भि तदुपपत्तिरिति तदुपपुल्लवेदाध्ययनाधिकल्पनेगौर
वमिति वाच्यं ॥ कर्मधारये रूढितिमुख्यार्थान्वयेन तदुपयुक्तवेदाध्ययनकल्पनस्य फलमुखत्वेन गौरवस्यादोषत्वादिति ॥ अ
त एव नतत्पुरुषापेक्षया कर्मधारयो योगीयानिति संगच्छते ॥ नञ्तत्पुरुषे अघटः पटः इत्यादौ नञः साक्षादेवान्वयबोधः ॥ तथा च घटप्रति
योगिकान्योन्याभाववान् पट इति बोधः एवं च घटपद घटस्य प्रतियोगिताभावयोरन्वयो भवत्येव ॥ अत एव चंद्र इव मुखमित्यादौ चंद्रपदार्थ
स्य उपमानपदार्थस्य साक्षादन्वयः निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधकाभावात् ॥ यदि च निपातार्थनाम्नार्थयोरपि भेदेनान्वये
तत्र व्युत्पत्तिरित्यादिग्रन्थसादाघटपदं घटप्रतियोगिकेलाक्षणिकं ॥ न च तथापि नञर्थसास्य पटे कथमन्वय इति वाच्यं ॥ न

लं४ औ४ ३ था४

सि॰ सं॥
॥४८॥

कुत्रापि

द्व

मपदस्य अन्योन्याभाववति लाक्षणिकत्वात्॥ न चान्योन्याभावे घटस्य कथमन्वय इति वाच्यं॥ संसर्गविधिकस्य लेपदार्थैक-
देशान्वयस्वीकारात्॥ कथमन्यथा चैत्रस्यापि नेत्रस्य चैत्रकस्य जनकत्वरूपैकदेशान्वय इति चेद् पदं चैत्रस इष्टेल्लक्षणकर
वपदं पवतात्पर्यग्राहकमिति रत्यं समासे नैशक्तिपदशक्यैवोपपत्तेः तच्छ्य पदं यौगिकरूढं योगरूढं यौगिकरूढं चेति चतु
र्विधं॥ तत्रयाचकपाठकादिपदं यौगिकं तत्र केवलावयवार्थ एव प्रतीपत्ते॥ घटादिपदं गवादिपदं चौषधिविशेषघातपाद
का न्यकर्णमुद्धपर्णी त्यादिपदं च रूढं अवयवशक्तिमंतरेण केवलसमुदायशक्तेरेव प्रतीतेः एवं पंकजादिपदं योगरूढं अवयव
शक्त्या समुदायशक्त्या च पद्मत्वस्य प्रतीतेः अवयवशक्त्यो पंकजनिकर्तृत्वेन रूपेण पंकजनिकर्तृरूपार्थस्य समुदायशक्त्या पु
द्मत्वेन रूपेण पद्मस्य बोध इति॥ केवलावयवशक्त्या कुमुदादिबोधं प्रति रूढज्ञानस्य प्रतिबंधकत्वान्न कुमुदादिबोधः॥ यौगिकरूढं तु उद्भिदादि
पदं तत्र उद्भेदनकर्तृत्वरूपान्यादेर्बोधोऽन्यार्थपर्यायोद्भिदादिबोधस्तु समुदायशक्त्येति॥ तैर्योगार्थरूढ्यर्थयोः स्वातंत्र्येण बोधात्॥ अप
भ्रंशनापि वक्तव्यं तर्हि [struck] कथमन्यथा गंगायां घोषः इत्यादौ तीरे शैत्यपावनत्वादिबोधः गंगापदं लक्षणया तीरबोधकत्वे शैत्य
पावनत्वादिबोधस्तीरे व्यंजनयेति॥ एतस्यां गंगातीरे घोषः इत्यादि नेत्यादिति चेन्न तीरे शैत्यादिविशिष्टतीरलक्षणयैवोपपत्तौ किं व्यंजनयेति
तिसंक्षेपः॥ क्विप्सु स्य कृत्वासिद्धा नमजोरीटिपतापादेर्याव सेपः॥ अथ प्रादीनामुपसर्गाणां द्योतकत्वं नतु वाचकत्वं॥ द्योतकत्वं च
र्थविशेषे तात्पर्यग्राहकत्वं॥ प्रजयतीत्यादौ तु जिधातोः प्रकर्षे लक्षणा प्रशब्दस्तात्पर्यग्राहकः यत्र प्रशब्दस्य प्रकर्षे शक्तिः॥ जिधातोः
जयेशक्तिरेवोच्यतामिति वाच्यं॥ प्रहारहरत्यादौ प्रकर्षानतुभावात्॥ उपसर्गस्य नामार्थत्वेनान्वयासंभवात् प्रकर्षस्यान्य
लभ्यत्वात् शब्दापर्तिकल्पनाच्च॥ अन्येऽन्यथाशब्दावरति॥ अथाख्यातस्य कृतौ शक्तिपर्यायतया केकरोतीति कृत्यर्थककरोतिनानि
रिवत्ताख्यातस्यावि वरणात्॥ व्यवहारादिवत् विवरणस्यापि शक्तिग्राहकत्वात्॥ पादकृत्यथा

लग्योहि कर्षेर न वं

॥राम॥
॥४८॥

नार
नार
१।३।६

तोः कृतौ शक्तिः आख्यातस्यापि कृतावेव शक्तिः तदा चैत्रः पाकं करोतीत्यत्र पाककर्मककृतिकृतिमानिति बोधः॥ स्यादिति चेन्न॥
तत्राख्यातस्याश्रयत्वे लक्षणास्वीकारात्॥ एवं कर्तृत्वस्य च चोपि यथा दिकर्तरि शक्तिरस्तादाकर्तृत्वस्य तत्र कृतिकर्ता इति बोधः स्या
दिति। तच्चोच्याश्रयत्वे लक्षणा॥ अत एव ब्राह्मणादिवदाश्रयपरत्वं तत्कर्तृपदस्य कृत्याश्रयत्वबोधकत्वमिति शिरोम
णि महाचार्याः रथो गच्छतीत्यादौ तु गमनानुकूलव्यापारे लक्षणा॥ नचरथनोदनादिमतिनिश्चेलत्वे पि पुरुषे गमनानु
कूलव्यापारस्य सत्त्वात्॥ गच्छतीति प्रयोगापत्तिरिति वाच्यं॥ गमनार्थविशिष्टव्यापारस्यात्र विवक्षितत्वात्॥ जानाति इच्छति
यततेद्वेष्टि इत्यादौ ज्ञानाद्यनुकूलकृतेरसत्त्वात्॥ नश्यतीत्यादौ तु प्रतियोगित्वे लक्षणा॥ अत्र वै
याकरणाः आख्यातस्यापि कृतिर्वाच्यत्वे चैत्रः पचतीत्यादौ पाकानुकूलकृतिमान्स्वचैत्र इति बोधः स्यात् आख्यातेन कर्तुरनभि
हितत्वात्कर्तृचैत्रपदोत्तरं तृतीया स्यादिति कर्माख्यातस्य लेतुफलमात्मनेपदार्थः कृत्यर्थ तृतीयार्थः तथा च चैत्रेण पच्य
ते तंडुलः इत्यत्र चैत्रकर्तृकपाकजन्यफलशाली तंडुल इति बोधः तत्र तंडुलपदोत्तरं द्वितीया स्यात्॥ आख्यातेन कर्मणोऽभि
हितत्वात्॥ अस्मन्मते तु पचतीत्यत्र चैत्रः पाककर्त्ता इत्यभेदान्वयबोधः चैत्रकर्तृका तंडुलकर्मिका पाचिक्रियेति शाब्दबोधः॥
तत्राख्यातेन कर्तुरभिधानात्॥ कर्तृपदोत्तरं तृतीया॥ चैत्रेणौदनः पच्यत इत्यत्राख्यातेन कर्माभिधानादोदनपदोत्तरं द्वितीया
येति चेन्न॥ संख्यानभिधानस्य। न भिधानार्थत्वात्॥ अपवर्गः आख्यातेन कर्मगतसंख्यापामभिहितत्वात्स्यां कर्तरि तृती
या॥ कर्मगतसंख्यापामनभिहितायां कर्मणि द्वितीयेति॥ अथानुकूलव्यापार एवाख्यातस्य शक्तिरस्तु तात्पर्य योगाद्वा तीत्यादिसा
धारण्यादिति चेन्न॥ कृतित्वस्य जातित्वेन शक्यतावच्छेदकत्वात्॥ अनुकूलव्यापारत्वस्य तु शक्यतावच्छेदकत्वे गौरवात्॥ तथापि कापानु
कूलता कृतेः कथमासत इति चेन्न॥ संसर्गविधया पतीत्यपि॥ अथाख्यातार्थसंख्या कुत्रान्वेति चेत्॥ आख्यातार्थकृतिविशेषे संख्यान्वयः विभक्त्यर्थे

इति नृ ब्ये१ नार

॥ १४७॥

प्रथमान्तपदार्थ... नन्वत्र

पा१ २१ ११

शेषणीभूततया मा वर्षः॥ आख्यातार्थविशेष्यस्य चैत्र तण्डुलं द्वितीयार्थावरुद्धत्वात्। किंतु चैत्र आख्याताऽर्थविशेष्यः विभक्त्यर्थाविशेषणत्वा
त्।। चैत्रेण पच्यते ओदन इत्यत्र चैत्रो नाख्यातार्थविशेष्यः॥ तृतीयार्थविशेषणत्वात्। किं त्वोदन तद्विशेष्यः विभक्त्यर्थाविशेषणत्वात्
चैत्रेण दृश्यते घट इत्यादौ तु स्थिरत्वानुकूला कृतिः इति बोधः नहि कर्माख्यार्थः अन्वयः इति चेत् तत्र कर्माख्याः आन्वयादौ त्वर्थिकमेक
कर्मेति। यद्वा चैत्रनिष्ठा स्थितिरिति धात्वर्थविशेष्यकान्वयबोध इति विभक्त्यर्थाविशेषणी भूतयोरपि कृतिधात्वर्थयोर्विशेष्यत्वे
पि नञ्समभिव्याहारे तयो नामार्थत्वाभावात्॥ अत्र धात्वर्थस्यादि त्वादिविवक्षायामुपिनदि वचनं असाधुत्वात्॥ अत्राख्यातार्थ
केवलान्वयोधात्वर्थकृतौ बोधः। अत एव जानाति त्यादौ वर्तमानाज्ञानाश्रयत्वं चैत्रे अन्वेति पचतीत्यादौ तु वर्तमानत्वं पाके कृतौ वा बुध्य
ते इति संक्षेपः॥ वर्तमानत्वं विषयविमतीतत्वं चाख्यातार्थविशेषार्थः॥ तत्र भविष्यत्वं न वर्तमानप्रागभावप्रतियोगित्वं। पचेल
िधि चैत्रे नाविकृतिप्रागभावस्य वर्तमानत्वात्। पक्ष्यतीति प्रयोगापत्तेः। किंतु प्रथमकृतिप्रागभावप्रतियोगित्वस्यैव भविष्य
त्वपर्यावसितत्वं।। पचति चैत्रे प्रथमकृतिप्रागभावनाशात् न तत्र तथा प्रयोगं॥ एवमतीतत्वं न वर्तमानध्वंसप्रतियोगित्वं। पच
ति चैत्रे प्रथमकृतिध्वंसस्य वर्तमानत्वादपाक्षीदिति प्रयोगापत्तेः किंतु चरमकृतिध्वंसप्रतियोगित्वस्यैवातीतत्वप्रसङ्गविषयत्वमिति॥
अथ चैत्रः ओदनं पचतीत्यत्र ओदनकर्मकपाकानुकूलकृतिमान् चैत्र इति बोधः चैत्रोदनकर्मत्वमोदननिष्ठविक्लित्तिविशेषः॥ स च द्वितीयार्थस्तदुक्त
नकत्वं धात्वर्थप्रतीयते। धात्वर्थः विक्लित्तिजनकव्यापारविशेषस्तत्र जनकत्वं संसर्गमर्यादया भासते पाकानुकूलत्वं कृतावपि संसर्गमर्यादयेति। पतत्क्रि
नरो याजन्यफलशालित्वं कर्मत्वमिति तन्न वृक्षात् पर्णं पततीत्यत्र क्रियाजन्यसंयोगविभागाश्रयत्वस्य वृक्षेपि सत्त्वात् तयोः कर्मत्वापत्तेः किं क्रियापाः
धात्वर्थत्वात् जन्यत्वाश्रयत्वयोः संसर्गमर्यादया भानाभ्युपगमात् फलमात्रस्य वा द्वितीयार्थ कर्मत्वात्॥ अत एव फलानुकूलो व्यापारो धात्व
र्थ इत्यपि नि॥ धात्वर्थफलानुकूलत्वे नैकलक्षितविलक्षणव्यापारत्वस्य विवक्षणात्॥ ननु फलानुकूलत्वमपि धात्वर्थविशेषणौरवात् अनु
कूलत्वस्य संसर्गत्वात्॥ अनेनान्यस्यैव राष्ट्रार्थत्वात्॥ अथ वंक्रियामात्रस्य धात्वर्थत्वे तिङ्न्योपर्यायपत्तापत्तिः॥ तथाहि॥ उत्तरदेशसं

स्प२ प२

॥ राम ॥
॥ ४७ ॥

संयोगानुकूलकर्माव्यपबोधजनक इति

उत्तरदेशसंयोगद्वितीयापाः

व्यापारो बोधकमिति

योगानुकूलकर्मार्थस्तथैव देशविभागानुकूलकर्मस्त्यजेरर्थः॥ तत्र यदि क्रियामात्रं धात्वर्थस्तदा ग्राममागच्छतीति वत् ग्रामं त्यजतीति प्रयोगापत्तेरि
ति चेन्न। गच्छतीति समभिव्याहृतद्वितीयायाः उत्तरदेशसंयोगानुकूलकर्मबोधकत्वं त्यजतीति समभिव्याहृतद्वितीयायास्तु पूर्वदेश
विभागानुकूलकर्मबोधकत्वमिति॥ नानुपपत्तिलेशोपीति अन्ये तु फलावच्छिन्नव्यापार एवार्थः॥ तत्र फलमवच्छेदकं कर्मद्वितीयार्थ
स्तु फलाश्रयत्वम् तथा च ग्रामं गच्छतीत्यादौ उत्तरदेशसंयोगावच्छिन्नक्रियायाः ग्रामपूर्वदेशविभागावच्छिन्नक्रियायात्यजर्थ
तया त्यजतिगच्छ्योनपर्यायता॥ न च फलांशपलस्य द्वितीयार्थत्वे गच्छत्यर्थतानवच्छेदकसंयोगात्मकफलाश्रयस्य कर्म
त्वापत्तिरिति द्वितीयायामिति वाच्यं॥ सकर्मकधात्वर्थ समभिव्याहृतद्वितीयायाः धात्वर्थतावच्छेदकफलाश्रयत्वमनेन कर्म
कत्वमिति न दोषः एवं च सकर्मक धात्वर्थत्वक्रियाजन्यफलशालित्वं कर्मत्वमिति विवक्षितेन वृक्षात् भूमौ पर्णं पततीत्यत्र न दोषः ननु चैत्रो ग्राममागच्छ
तीत्यत्र चैत्रपदोत्तरद्वितीयापत्तिः धात्वर्थतावच्छेदकीभूतगमनानुकूलसंयोगाश्रयत्वस्य चैत्रेपि सत्त्वादिति चेन्न॥ धात्वर्थनिष्ठकी
रणत्वेनासति समभिव्याहृतं धात्वर्थतावच्छेदकफलाश्रयत्वस्य विवक्षितत्वादिति। आकाङ्क्षायोग्यतासत्तिमत्पदकदम्बलोभ्द्वा
सुकर्मकी [redacted] बोधोयोरयपादाकाङ्क्षादिज्ञानं शाब्दबोधे सहकारीत्याकाङ्क्षादिकं निरूप्यते॥ तत्र यत्पदं यत्पदे न सह पाठेनान्वयबोधजनकं तत्सद
स्यानत्पदसमभिव्याहारस्ताहशान्वयशाब्दबोधे आकाङ्क्षा॥ नवतिहि घटमानयेत्यत्र घटपदं अमूपदेन सह घटकर्मत्वान्वयबो
जनकमिति घटपदस्यामूपदसमभिव्याहारो घटाभिति बोधे आकाङ्क्षा॥ एवं घटकमिति पदमानयनपदेन सह घटकर्मकानयनबो
धजनकं भवतीति कुलापघटपदस्यानयनपदसमभिव्याहारो घटकर्मकानयनबोधे आकाङ्क्षा॥ एवं धातुपदमाख्यातपदेनान्वयबोध
जनकमिति धातुपदस्याख्यातपदसमभिव्याहारो धात्वर्थप्रकारककृतिविशेष्यकबोधे आकाङ्क्षा। एवमाख्यातपदं चैत्रादिपदेन
न्वयबोधकमिति॥ तस्य तत्राकाङ्क्षेति घटं च घटकर्मसंभानयकृतिरित्यतो शाब्दबोधः घटपदोत्तरकर्मत्वादिवाचकद्वितीयादिपदसमभि
क व्याहाराभावात्॥ नामार्थयोर्भेदेनान्वयबोधे त्रकारी भूतविभक्त्यर्थोपस्थितिकारणं॥ अन्यथा चैत्रस्तण्डुलं पचतीति प्रयोगापत्तेः॥ अथ

मं चैत्र

॥तिकं॥
॥६८॥

ह५ क्ला॰ ता१ ल५ नपन१ पे

कदाचपबोधे जाते तस्मान्नानाकारकान्वयबोधो न भवति॥ तन्निकांक्षान्वयबोधे पलेनानिराकांक्षत्वात्॥ अतएव गामानय इत्यतो गोकर्मकानयनविषयकशाब्द
बोधे जातेपि पुनस्तादृशान्वयबोधो न भवत्येव॥ परं तु गामानय भुङ्क्ष्व दंडेनेत्यतो भुक्तामित्यन्वयदंडकरणकगोकर्मकानयनगवीसान्वयबो
धो न भवत्येव न योग्यमानाकारकाभावादिति संक्षेपः॥ योग्यतातु एकपदार्थेऽपरपदार्थसंसर्गवत्त्वं॥ तेन पयसा सिञ्चतीति वाक्ये योग्य
द्यमान४ पयसि सेककरणकत्वस्य विद्यमानत्वात्॥ वह्निना सिञ्चतीति वाक्ये तु न योग्यं वह्नौ सेककरणत्वस्याविद्यमानत्वात्॥ योग्यतापाज्ञा
नं शाब्दबोधे कारणं॥ अन्यथा योग्यताभ्रमेऽपि भ्रमो न स्यात्॥ अयोग्यसंसर्गज्ञानस्य शाब्दबोधात्पूर्वं [illegible] स्यात् प्रथमं संसर्ग
ज्ञाने रूपयोग्यताज्ञानं न संभवतीति चेन्न॥ तत्तत्पदार्थोपस्थितौ ज्ञातायां संशयानिश्चयरूपस्य योग्यताज्ञानस्य संभवात्तस्य हेतु
त्वावधारणात्॥ शाब्दबोधस्तु निश्चयात्मक एव॥ ननु तत्तद्घटवन्तं वा तत्संशयादपि ननु तत्तद्घटवदिति शाब्दबोधो भवत्येवेति
चेद्घटत्वस्यापि ननु तत्तद्घटोस्तीति वाक्याच्छाब्दबोधो भवत्येवेति॥ अत्र वदन्ति योग्यताज्ञानस्य कारणत्वे प्रमाणाभावो वह्निना सिञ्चतीति
वाक्यात् सादेसेके च वह्निकरणत्वसंसर्गाभाववत्तत्त्वावगाहिज्ञानस्य प्रतिबंधकत्वादेव न शाब्दबोधः यत्र पाठेऽपि गृहीताप्रामाण्य
[illegible]क तद्धर्मितावच्छेदकतद्धर्मावच्छिन्ननिश्चयस्य दोषविशेषाजन्यलौकिकसन्निकर्षाभावजन्यतद्धर्मितावच्छेद
कतद्धर्मावच्छिन्नविशिष्टज्ञाने च प्रतिबंधकत्वात् तस्य शाब्दप्रतिप्रतिबंध्यकत्वमिति॥ तथा च तादृशसंसर्ग[illegible]ग्रहस्य प्रति
प बंधकत्वात्तदभावो योग्यतासा चस्त्रसंसतीहेतुनतज्ज्ञानमिति॥ न चैतादृशाभावग्रहदशायां हृदो वह्निमानिति वाक्याच्छाब्दबोधापत्तिः इष्टापत्तेः॥ न चा
संसर्गाग्रहस्य कारणत्वापेक्षया संसर्गाग्रहस्य कारणत्वं लघु त्वं न लाघवादिति वाच्यं॥ निरुक्तप्रतिबध्यप्रतिबंधकभावेनैवोपपत्तौ संसर्गाग्र
हस्य मानाभावादिति संक्षेपः॥ पदाव्यवधानमासत्तिः॥ इत्थं च गिरिर्भुक्तमग्निमान् देवदत्तेनेति वाक्ये नासत्तिर्गिरिर्भुक्तं वह्निमान्देवदत्ते
नेति वाक्ये न नासत्तिरेवेति॥ यद्यपि श्लोकादौ प्रत्यक्षासिद्धव्यवधानादासत्त्यभावस्तथापि पुनरासत्तिसंपादपयोजनावाक्यादन्वयबो
धयति॥ परे तु पदस्य पदार्थस्य पदार्थेन सहाव्यवधानेनोपस्थितिरासत्तिः तस्या उपस्थितेर्ज्ञानरूपत्वात् ज्ञानं न कारणमिति
तद्भाने शाब्दमहति॥ सा स्वरूपसती कारणमित्याहुः॥ अथ घटमानय घटकर्मतानयनकृती तां पुगद्ज्ञानासंभवः॥

र८ वेत्या१

॥६८॥

उद्बोधकलौसत्॥२

न्याये२ किं स्य३

श्रुतरविनाशिनां क्रमिकाणां चेत्तनाभावादिति चेन्न॥ तत्तत्सदातु भवजनितसंस्कारैः युगपत्तत्तत्पदस्मरणे सति तत्तत्पदार्थानां युगपत्स्मरणसंभ
वाच्छाब्दबोधस्याबाधितत्वात्॥ स च शाब्दबोधः खलु कपोतन्यायेन राजपुरुषप्रवेशेन वा तद्घया॥ वृद्धाः पुवा नरिशावकपोताः खलेप्याली
युगपत्पतन्ति॥ न येव चान्ये युगपत्पदार्थाः परस्परेणान्विपीनो नमन्ति॥१॥ पिधयदाकांक्षितयोग्यसन्निधानेभ्रपद्यते॥ तेन ते नान्वितः स्वार्थः पदैरेवानुगी
यते स्युभीर्भवि नाव्यबोद्धव्यमिति॥ तात्पर्यज्ञानमपि शाब्दबोधे कारणं तच्छेदपदनेतास्मिन्नर्थे ज्ञान्यपबोधं जनयत्विरहेमिस्यापरपितुरिच्छा ननु वक्तुः
मौनिश्लोकादौ वक्तुरभावेपि अभिसंधानात् सलाघशाब्दबोधः सैंधवमानयेत्यादौ तु पदार्थैतुरगे तात्पर्ये तदा तुरगस्य बोधः॥ पदार्थवणे तात्पर्यं तदा लव
णस्य बोधः तात्पर्यग्रहस्तु प्रकरणादिना [illegible] नानापदस्थले प्रकरणाभिबुनिपामकमस्तु किं तात्पर्यग्रहेणेतिवाच्यं॥ प्रकरणस्याननुगतत्वादि
तिभ्भ्रत्रद्वारनिस्तादौ तु पचेहीनिपदाध्याहारः न चार्थज्ञानं विना शाब्दस्याप्रयोजकत्वात्॥ अर्थाध्याहारएवास्तु पदाध्याहारेणेति वाच्यं॥ पदजन्य
पदार्थोपस्थितेः शाब्दबोधं प्रति हेतुत्वादेव पदाध्याहारस्यावश्यकत्वात्॥ स च शाब्दो द्विविधः विध्यर्थवादभेदात्॥ तत्रकर्तव्यापैधिदेशकालिङादि
तं विधिर्विध्यर्थस्तु कृतिसाध्यत्वबलवदनिष्टाननुबंधित्वमिष्टसाधनत्वं चेति॥ प्रवृत्तिनिवृत्तिज्ञानानां कारणत्वं बलवदनिष्टाननुबंधि
त्वतुरष्टाप्तौ नानसेपि कदुःस्याधिकदुःस्याजनकत्वं॥ तेन कर्मकांड[illegible]पि प्रवर्त्तकत्वं बोध्यं॥ कृतिसाध्यो बलवदनिष्ट जनके ग१
तस्मादिष्टसाधनतोज्ञानेप्रवृत्तिस्यादिति बलवदनिष्टाननुबंधकत्वेसति कृतिसाध्यताज्ञानत्वेन प्रवर्त्तकत्वमिति चेत्॥ मं[illegible]कृ
नेष्टसाधनं बलवदनिष्टाननुबंधिकृतिसाध्यं चेति ज्ञानवतो मं[illegible]कारणे प्रवृत्तिस्यात्॥ तथा न बलवदनिष्टाननुबंधीष्टसाधनत्वेसति
लेसप्र॰ज्ञान तिकृतिसाध्यत्वेन प्रवृत्तिं प्रतिहेतुत्वमिति न कोपि दोषः इत्थं चाविनीगम नाविरहात्॥ बलवदनिष्टाननुबंधीष्टसाधनत्वेसति कृ
दि तिसाध्यज्ञानत्वेन कृतिसाध्यत्वविशिष्टेष्टसाधनत्वे सति बलवदनिष्टाननुबंधित्वज्ञानत्वेन बलवदनिष्टाननुबंधित्वविशि ष
ष्टकृतिसाध्यत्वे सति इष्टसाधनताज्ञानत्वेन प्रवर्त्तकत्वे गौरवमिति कृतिसाध्यताज्ञानत्वस्य साध्यनताज्ञानं बलवदनिष्टाननुबं
चित रौनेच्छस्य तत्राऽन्वयव्यतिरेकाभ्यां प्रवर्त्तकत्वात्॥ अत्र प्राभाकराः कार्यताज्ञानं प्रवर्त्तकं तेषामयमाशयः तान्नस्य प्रवृत्तौ [illegible]
चिकीर्षा तिरिक्ता नापेक्षितमस्ति सा च कृतिसाध्यत्वप्रकारिकेच्छा॥ सा पुनः कृ निसा१

त्रस्प० ले८ जर पामा२

शि·सं·॥
॥४९॥

तत्कालजीवनशुचित्वादिकं

२८

त्वप्रकारकज्ञानजन्या॥ ज्ञानेच्छयोः समानप्रकारकत्वनियमात्॥ तथा च प्रवृत्तिं प्रति कृतिसाध्यताज्ञानमेव कारणं॥ नन्वेवं बलिष्ठजनके यत्नबलवद
निष्टजनकेपि सर्वदेवमधुविषसंपृक्तान्नभोजनेपि प्रवृत्त्यापत्तिस्तत्र कृतिसाध्यत्वप्रकारकज्ञानस्य सत्वादिति चेत् न निःस्या विशेषणाज्ञ
प्रति तासंख्यानजन्यकार्यताज्ञानं च प्रवर्तकं॥ काम्ये चेष्टसाधनताज्ञानकालीनं कृतिसाध्यताज्ञानं कारणं॥ प्रवृत्ति सावधि नंप्रति कृतिसाध्य
ताज्ञानमात्रं कारणं॥ न पुनरिष्टसाधनत्वविषयकं कृतिसाध्यताज्ञानं कारणं नाप्यवादिति वाच्यं॥ नित्येसंध्यावंदनादाविष्टसाधन
त्वाभावात्॥ यद्यपि संध्यामुपासते येनुसंततं संशितव्रताः॥ विधूतपापास्ते यांति ब्रह्मलोकं सनातनमिति ब्रह्मलोकादिरूपफलश्रवणा
पयपरिहारास्तितथापि साध्यत्वसाधनत्वयोरेकत्रैकदाविरोधात्॥ तथाहि॥ साध्यत्वमसिद्धत्वधर्मः सिद्धत्वादशायां तदभावात्॥ साधनत्वं
सिद्धत्वधर्मः असिद्धदशायां तदभावात्॥ न ह्येकत्रैकदैकेन पुरुषेण सिद्धमसिद्धं मवगम्यत इति कथमेकदा कृतिसाध्यत्वकामिष्टसाधनत्वबोधा
गदौ स्यादिति नन्वनित्ये काम्ये तत्राभेदे नैसाधनत्वयोर्न विरोधाभावादिति चेत् न॥ एकस्मिन्नपि कृतिसाध्यत्वोदनसाधनत्ववदेकस्मिन्नपि
गेकृतिसाध्यत्वस्वर्गसाधनत्वमनेकविरोधाभावादिति॥ तथापि तस्यफलत्वेकामनाधीनकर्तव्यत्वात्॥ काम्यत्वमेव स्यात् तथा चकाम
नाविरहेतिविशेष्यकरणे प्रत्यवायो न स्यात् तदा नीं कामनाया अभावे पुरुषस्यानधिकारित्वादिति चेत् न॥ काम्यत्वात्तेपि कर्तव्यत्वेसं
ध्यावंदनादीनां नित्यत्वं तथाभावात् नित्यत्वप्रकरणे प्रत्यवायजनकत्वं तच्च संध्यावंदनादावस्तीति नाविरोधः इति संध्यावंदनस्यनित्य
काम्यत्वेकामनाविरहेवतोप्यकरणे प्रत्यवायजनकत्वं॥ तथा च काम्यत्वं स्वर्गादिकाबोधतान्मकरणे प्रत्यवायजनकत्वमित्यस्त्वमितिनदो
षलेशोपीति॥ अपनेकत्वं जन्यत्वं वेदिदप्यजनकत्वं जनक्षणस्यकृतिसाध्यत्वेष्टसाधनयोः इष्टत्वेपि बलवदनिष्टाननुबंधित्वरूपविध्य
र्थेन्यपकः क्वोपचरितांकरणात् बलवदनिष्टजनकेविपक्षाभ्यणोबलवदनिष्टज्ञानात्स्यवर्तितएव॥ तात्पर्याग्यागमनादावप्युक्त
दुरागादवशोदास्ति कोपि प्रवर्तेत रागस्यबलवत्तद्धा नप्रतिबंधकत्वात्॥ एवं च कृतिसाध्यत्वेष्टसाधनत्वनियमावलबदनि
ष्टाननुबंधित्वेन कारणत्वेपयोपि विशिष्टाभावरूपा विध्यर्थतिषेधोप्युपपाद्यते॥ स्यनेनानिष्टुं जोतस

नः

या ५ २५ द

॥गग॥
॥४९॥

शि·सं·॥
॥५०॥

तच्चप्रत्यक्षादिभ्यो विलक्षणमिति चेन्न॥ अयं देवदत्तः रात्रिभोजनवान् दिवाभोजित्वे सति पीनत्वात् इति दिवानुमानेपीनत्वात् पन्नेतत्त्वैवं पपादिनसत्त्वावं
ज्ञानस्वरूपीनदितिकेवलव्यतिरेकी अर्थापत्तिर्नामान्तरं॥ अप्रामाण्यानिश्चाभावसिद्धी संभवतितत्रैव चमानेनपरयामः नताव स्वलक्षणप्रमाणमेतृ
तेज्ञातीत्युपलादितिचेत्॥ [struck out] ननु हि स्वकीये विषये ज्ञानता रूपेण लक्षणं फलमनुमापयति॥ तथा ज्ञानतया घटो विषयितास्त
ज्ञानजन्य वच्चेत ज्ञानवान् ज्ञानवत्वादिसदनुमानेन ज्ञानानुमितिर्भ्रमपमाणाज्ञानातप्रामाण्यमपि विषयीकरोतीति प्रामाण्यस्यापवज्ञानग्राहकसाम
ग्रीग्राह्यत्वनियमात्स्वतस्त्वमपीति द्रव्यस्यादुस्तान्॥ ज्ञानताप्रामाण्याभावस्य प्रकाशत्वात्॥ ननु स्वतन्त्रेज्ञानस्य तीव्रपत्वेनसोऽप्यात्वेकप्रसिध्यानुम
नातुपपत्तेः॥ कतरत्प्रामाण्यग्राहकमिति॥ अत्रगुरवः ज्ञानमात्रं पटम्हं जानामीकारकं तथा ज्ञानं स्वविषयं घटादिकं स्वात्मानं ज्ञानं स्वाश्रियकरणात्
मानं प्रकाशयतीति तथातद्गतं प्रामाण्यमपीति॥ ज्ञानानां त्रिपुटिप्रत्यक्षत्वनयास्वप्रकाशत्वकनियमादि स्वाद्रुत्वात्॥ चाक्षुषादिज्ञानात्मनोर्न ज्ञाने
नेप्रमाणाभावात् चाक्षुषादिज्ञानेऽद्रुतरूपस्य हेतुत्वात् उपघात स्यपवैदमाभेजेनसन्निकर्षाभावात्॥ यदि ज्ञानं ज्ञातं तदा ज्ञाने प्रामाण्यसं
शयो न स्यात्॥ प्रामाण्यस्य निश्चितत्वात् निश्चिते संदेहानुदयात्॥ यदि च न ज्ञानं तत्वायि व्यर्थं ज्ञानाभावाद्धर्मसंशयः मुरारिमिश्रमते तु घटोय
ज्ञाना मित्यादिकारतद्दृक्तं तद्बुद्धिदोष्यत्वेसति तत्प्रकारकत्वरूपं प्रामाण्यं घटमहं जानामीत्यादि प्रत्यक्षानुव्यवसायेन गृह्यते॥ विषयोनिरूप्यहि
यो ज्ञानं अतो ज्ञानविनिवेश [struck out] वाविषयमितिव्यवसायेभासमानेऽप्य र्मविशेष्यो बोद्धव्या ज्ञानं अनुव्यवसायः विषयीकरोति व्यवसायस्य प्रत्यक्षो रो
सतेस्तुल्यत्वादिति॥ अपभावः तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वरूपं प्रामाण्यं स्वतोग्राह्यं तत्र स्वतस्त्वं पावद्ज्ञानग्राहकसामग्रीग्राह्य
त्वं॥ तद्गुरुमते ज्ञानजन्यज्ञानतालिंगकानुमित्या वा पक्षज्ञानेन गृह्यते सति तद्गतं प्रामाण्यमपि तथानुमित्येव स्वीयपत्वावा गृह्यते॥ गुरुमते तु ज्ञानस्य
स्वप्रकाशत्वात् ज्ञानेन तत्प्रामाण्यस्वरूपेण गृह्यते॥ मुरारिमतेऽनुव्यवसायेन ज्ञानेन प्रामाण्यं गृह्यत इति सर्वेषां मीमांसकानां मते ज्ञानविष
यकज्ञानेन प्रामाण्यं गृह्यत इति तद्गतं प्रामाण्यमपि तत्रानिश्चितत्वपदार्था ज्ञानग्राहकग्राह्यत्वाभावात्॥ तथाहि घटत्ववान् पयो
व्यवसायोपनीतो तु व्यवसायेऽभासतेत्र मनसो बहिरस्वात्तत्र्यस्य पनीत मर्यादया पटत्ववद्विशेष्यकतासमर्गोनभिघटत्ववतोभानमि
तिघटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकत्वं प्रामाण्यं वहिर्गुणापि [blot] गुणा बहिरिति नामप्रामाण्यग्रासगादिति तद्विरो

॥गग॥
॥५०॥

चं० १

॥श्येनेनाभिचरन् यजेतेत्यत्र तु श्येनस्य बलवदनिष्टाननुबन्धित्वमप्यस्तीति तस्य वधसाध्यनरकं ननु नरकसाध्यं न श्येनसाध्यो वधो वध्यस्य नरकमित्युक्तौ
॥तान्नत्वश्येनस्य मरणानुकूलव्यापारत्वेन हिंसात्वं किन्तु वध्यस्य परमपीति वाच्यं ॥ कुपनस्यपनतिकृत्वमरणोत्पादकत्वेन कुपकर्तुरेव तन्नत्वस्यातः ॥ अपमरणोद्देश्यकाभिमरणानुकू
॥लव्यापारो हिंसा कुपकर्तुर्मरणोद्देश्यकमरणानुकूलव्यापारत्वाभावान्न तत्कर्तुः नयं स्नान न तत्र संसर्गाद् इति चेन्न तर्हि कारीरीमरणोद्देश्यकृतजपस्यापि हि
॥सात्वापत्तिरिति चेन्न ॥ अदृष्टाद्वारा मरणोद्देश्यकमरणानुकूलव्यापारो हिंसा ॥ साचकारीमरणोद्देश्यकृतजपे नास्ति ॥ जपस्यादृ
॥ष्टाद्वारकत्वात् ॥ श्येनस्याप्येवमदृष्टाद्वारकत्वान्न दोषः ॥ परं सा सीनोत पापिश्येनेनत्र वधति ॥ श्येनस्य नरकजनकत्वे वा विश्येनजन्यवध्य
॥स्य नरकजनकत्वादितिसंक्षेपः ॥ अथ स्वर्गकामोपजेतैत्र पापस्य स्वर्गसाध्यनत्वं विधिनाबोध्यं श्येनेन [illegible] स्वेनवर्तिनां शुतैरथनाशितो
॥यागस्य कालान्तरभाविस्वर्गजनकत्वं भिन्नमिति चेन्न ॥ उत्पन्नस्य यागजन्यापूर्वद्वारा यागस्य स्वर्गजनकत्वं आशुतराविनाशिनः कालान्तरभाविफलज
॥नकत्वस्य ताबल्कालस्थायिनो व्यापारकत्वनियमात् ॥ सच व्यापारोऽपूर्वमिति ॥ तदुक्तं कुसुमाञ्जलौ ॥ चिरध्वस्तं फलायालं न कर्मातिशयं विना
॥ विनेति अपातिरक्तो विधिर्विधेयः ॥ अपूर्वविधिः नियमविधिः परिसंख्याचेति तथा चोक्तं ॥ विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ॥ तत्र चा
॥न्यत्र च प्राप्ते परिसंख्येति गीयते ॥ तत्राप्राप्तप्रापको विधिर्विध्यपूर्वविधिः यथा व्रीहीन्प्रोक्षतीति ॥ प्रोक्षणस्य संस्कारविशेष
॥जनकत्वं विना विधिं न प्राप्नोति ॥ पक्षान्तरेण प्राप्तावप्राप्तपक्षान्तरे विध्यापकत्वं नियमविधित्वं यथा व्रीहीनवहन्ति ॥ अत्र नखविलुञ्चनेन
॥पि तण्डुलनिष्पत्तिः संभवतीति पक्षे नियमविधिः ॥ तत्र निवृत्तिमात्रं विध्यापकत्वं परिसंख्याविधित्वं यथा पञ्चपञ्च
॥नखा भक्ष्या इत्यत्र नियमः पञ्चनखाः पञ्चैव भक्ष्या नेतरे शशकः शल्यकी गोधा [illegible] कूर्म इति पञ्च पञ्चनखाः विकल्पाः [illegible]
॥रक्तानेतराः अभिज्ञाः कल्पनत्वमनादित्वं संक्षेपः ॥ विधिनिषेधार्थवादः ॥ सोऽपि त्रिविधः ॥ गुणानुवादः अर्थवादः भूतार्थवादः ॥ तथा चोक्तं ॥ विरोधे गुणवादः स्यादनुवा
॥दोऽवधारिते ॥ भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः इति ॥ तत्र गुणवादः आदित्यो यूप इत्यादौ ॥ अनुवादो अग्निर्हिमस्य भे
॥षजमित्यादौ ॥ भूतार्थवादस्तु वज्रहस्तः पुरन्दर इत्यादाविति संक्षेपः ॥ निरूपितानि चत्वारि प्रमाणानि ॥ न च अर्थापत्तिरपि प्रमाणमस्ती
॥ति वाच्यं ॥ न चाहिपीनो देवदत्तो दिवा न भुङ्क्ते रात्रौ भुङ्क्त इत्यस्य पीनत्वान्यथानुपपत्त्या रात्रिभोजनकल्पनमर्थापत्त्या प्रमाणा रात्रि भोजनमर्थो

त्रि० ४ न्यं० ५ वादा० ४ स्व० ५ ज स्पते

(left margin: मनुपपन्न; मा; right margin: म)

गा० ९

॥प्यकत्वावच्छेदेन तत्प्रकारकत्वं वाच्यं ॥ गुणत्वव्यवहितदोषव्यापकत्वावच्छेदेन व्याप्तिसप्रकारकत्वात् ॥ व्याप्तिव्यवहितदोषव्यापकत्वावच्छेदेन गुणत्वप्रकारकत्वा
॥न्वयेन तत्र तत्राप्रामाण्यं ॥ अनुव्यवसायेनु तद्व्यवहितदोषव्यापकत्वावच्छेदेन तत्प्रकारकत्वानवधारणात्स्वतन्त्रसंगत व्यवहितदोषव्यापकत्वावच्छेदेन तत्प्रकारकत्वा
॥स्य प्रथममनुपस्थितेरिति प्रामाण्यस्य स्वतस्त्वमनुपपन्नं किन्तु अनुमानग्राह्यत्वं रूपपरतः स्वरतिप्रयोग इदं पुरुषत्वप्रकारकज्ञानं तत्स्वरूप
॥रादिमतिपुरुषत्वप्रकारकज्ञानत्वादिति ॥ प्रामाण्यं परतो ग्राह्यं ॥ परतः तन्मनुमानग्राह्यत्वं ॥ अथ तत्कार्यकत्वादिमति पुरुषत्वप्रकारकज्ञानत्वस्य
॥हेतुत्वे तं पनविशेष्यतान्तस्य तु व्यवसायेनेव नहि दीपतः प्रकृते तौ पटविशेषः पुरुषत्वविनिपुरुषत्वप्रकारकत्वमप्यनुव्यवसायेनैव गृहीतमिति तत्र ॥ नत्वनु
॥हेतुत्वे तत्र पविशेष्यतान्तस्य तु व्यवसायेनैव ग्राह्यत्वादिति ॥ अत्र तु निरूपकहेतुग्राहकत्वाच्च तदग्राहकत्वादिति संक्षेपः ॥ ननु
॥दत्तत्वात् ॥ न हि व्यवहितदोषव्यापकत्वावच्छेदेन तत्प्रकारकत्वानुव्यवसायेन ग्राह्यदेव ज्ञानत्वावच्छिन्नत्वानुपपत्त्या ॥ नचैवं शुक्तौ रजतत्वप्रकारकज्ञा
॥स्य प्रकारकज्ञानत्वे भ्रमत्वानुपपत्तिः ॥ न तु व्यवहितदोषव्यापकत्वसप्रकारकत्वं रजतत्वप्रकारकज्ञानस्याप्यस्तीति चेत् कथं तर्हि शुक्तौ इदं रजतमिति ज्ञाने ॥ ननु रज
॥तत्वप्रकारकत्वेन तत्र असंसर्गाग्रहमात्रं ॥ अथ कस्यचित् शुक्तिरजतभ्रमं अन्यथाख्यातिरिति ॥ असंसर्गाग्रहस्य स च हेतुस्तेषां केचित्संवादिनीप्रवृत्तिरिति
॥न भ्रमत्वस्यानुपपत्तिर्न तत्र व्यवहितदोषव्यापकत्वप्रकारकत्वादिति चेत् ॥ अख्यातिवादिनां प्रभाकराणां मते असंसर्गाग्रहः कारणं संवादि न्यायप्रवृत्तौ तु तत्प्रकारकसंवादिन्याः प्रवृत्तौ तद
॥तिरिक्तविवेकाभावः स्यात् ॥ अन्यत्र संसर्गाग्रहस्यापि विशेषादिति चेन्न ॥ तदभावे तदसंसर्गाग्रहः कारणं संवादिन्यां प्रवृत्तौ तु तत्प्रकारकसंवादिन्याः प्रवृत्तौ संसर्गज्ञाने
॥नाववर्तितदसंसर्गाग्रहः कारणमिति चेत् ॥ अत्राख्याते रजतत्वप्रकारकत्वे तत्प्रकारकविशिष्टज्ञानासंसर्गाग्रहापेक्षयालाघवादु जतत्वसंसर्गज्ञाने इति विशिष्टज्ञा
॥स्य हेतुत्वमनुच्यते तत्प्रकारकत्व तत्वविशिष्टज्ञानासंसर्गाग्रहो वर्त्तते वाच्यः ॥ विशेषणज्ञानं विशेष्येन्द्रियसन्निकर्षस्तदसंसर्गाग्रह इति विशिष्टज्ञाने असंसर्गाग्र
॥स्य हेतुत्वमनुच्यते ॥ तत्प्रकारकतत्वविशिष्टमितिज्ञानं वाच्यं ॥ विशेष्यं शुक्तादिपरसन्निकर्षः शुक्तिरजततत्वसंसर्गग्रहसंपुरुषसमवायस्यसत्वा
॥त्प्रतिहेतुत्वमिति सिद्धान्तात् ॥ भूतलेनिच शुक्तौ विदरजतत्वमिति ज्ञाने रजतत्वस्य न सन्निहितेरजतेरजतत्वेन संयुक्तसमवायस्य सत्वा
॥ह इति नान्यत्र रजते सन्निकर्षाभावात् कथं रजतत्वप्रकारकत्वं प्रत्यक्षमिति चेत् ॥ अन्यथा भ्रमापातात् किं कारणं
॥त्वा ॥ अत्र सन्निहितरजतस्य ज्ञानलक्षणप्रत्यासत्त्या सम्बन्धात् ॥ कथमन्यथा शुक्तौ रजतत्वप्रकारिकाप्रत्यक्षमिति ॥ अप्रमापा किं कारणं अनुमितौ स्वाप्यवति स
॥किं वा भ्रमापादिनिति चेत् ॥ प्रमा या गुणः कारणं अप्रमायां दोषः ॥ तत्र प्रत्यक्षप्रमायां विशेषणवति विशेष्ये इन्द्रियसन्निकर्षो गुणः अनुमितौ व्याप्यवति पक्षे
॥लिङ्गज्ञानं स्वरूपं गुणाः ॥ उपमितौ साकल्यज्ञानं शाब्दे तात्पर्यज्ञानं गुणः इत्यादि प्रमा गुणाः ॥ तिप्तादि पित्तादयो दोषाः ॥ भ्रमे तु अनुगतः पतत्पीतः शंखवत्सादौ पित्तादयो दोषाः ॥ अप्रमायां तु दोषाः कारणमिति ॥

चार त्रि० १

॥ पे० ॥

(left margin: ल; माना; विवेक; right margin: गो)

धर्म स्य कर नि॰ त्वे

षुः वंशोरग प्रयेपद्रकवंसा॥ ज नयहतिकेन्यपरिमाणग्राहेद्वरसमिति स्वपंचिमाव्यबोध्यं॥ अथैतावता प्रबंधेन सप्रपंचं बुद्धिं निरूप्य सुखादिगुणा४
निरूप्यंते॥ को ह्यजन्यसुखं॥ तच्च सर्वेषामनुकूलवेद्यं॥ तथा च सुखत्वावच्छिन्नं प्रति धर्मः कारणं॥ ईश्वरे धर्माभावान्न जन्यसुखं नित्यसुखं
तु भवत्येव॥ नित्यं विज्ञानमानंदं ब्रह्मेति श्रुतेः॥ अधर्मजन्यं दुःखं तच्च सर्वेषां प्रतिकूलं तथा चाधर्मत्वेन दुःखं प्रति कार्यकारणभा
वि वेति॥ इच्छात्वजातिमतीच्छा॥ सा द्विविधा फलविषयिणी उपायविषयिणी च तत्र फलेच्छां प्रति फलज्ञानं कारणं॥ फलं तु सुखं दुःखाभावश्च
धि त्री॥ धर्मे पुरुषार्थाः॥ फलेच्छा तु उपायेच्छां प्रति कारणं॥ फलेच्छां प्रति नान्येच्छा कारणं॥ फलं स्यादित्येच्छानधीनेच्छाविषयत्वात्॥ उपायेच्छां
प्रतिच इष्टसाधनताज्ञानं कारणं॥ उपायेष्टसाधनताज्ञाने जाते सत्युपायचिकीर्षा॥ सा च कृतिसाध्यविशेष्यका॥ कृतिसाध्यत्वप्रकारिके
च्छा॥ पाकं कृत्या साधयामीति प्रतीतेः॥ तां प्रति कृतिसाध्यताज्ञानं कारणं॥ इष्टसाधनताज्ञानं चेति॥ कृत्यसाध्ये कृतौ साध्यताज्ञाना
भावान्न चिकीर्षा॥ द्वेषत्वजातिमान्द्वेषः स च [illegible] कारणं॥ बलवदनिष्टसाधनताज्ञानं द्वेषकारणं॥ बलवदिष्टसाधनताज्ञानं हि नांतरीयकदुःखाधिक
दुःखाजनके तु॥ इत्थं च नांतरीयकदुःखजनके पाकादौ न द्वेष इति॥ प्रयत्नत्वजातिमान्प्रयत्नः स त्रिविधः॥ प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदा
वृत्त्या त्॥ तत्र प्रवृत्तिं प्रति प्रयत्नं प्रतीष्टसाधनताज्ञानं बलवदनिष्टा ननु विधिलकृतिसाध्यताज्ञानं च कारणं कृतिसाध्यत्वप्रकारिकेच्छा ज्ञानं च का
रणं इष्टसाधनत्वादिज्ञानं विना चिकीर्षानुपपत्तेः॥ एवमुपादानप्रत्यक्षमपि कारणं॥ निवृत्तिं प्रति च द्विष्टसाधनताज्ञानं द्वेषश्च कारणं॥ जीवनयो
नियत्नस्य तु [illegible] जीवनादृष्टं कारणं [illegible] जीवनमस्ति॥ अधिकं आदि॥ स्वादिस्वरूपशरीरप्राणसंचारस्तु प्रयत्नं विना न सं
भवतीति तेन तदनुमानमिति॥ स्नेहत्वजातिमान्स्नेहः स च स्वर्णादौ पिंडीभावहेतुः [illegible] पुनः स द्विविधः नित्यानित्यभेदात्॥ तत्र नित्यो जलपरमाणौ जल
घृतकादौ अनित्यः सर्वजलमात्रवृत्तिः तैलादौ तु जलस्यैव स्नेहः तैलांतरवर्तिजलस्नेहस्योत्कर्षाद्दहनानुकूल्यं॥ ननु कथं स्नेहवज्जलेन वह्नि
विनाशः संस्कारस्त्रिविधः॥ वेगो भावना स्थितिस्थापकश्चेति॥ वेगाख्यसंस्कारो द्विविधः कर्मजवेगजश्च॥ स च वेगः पृथिव्यादिचतुष्टयमनोवृ
त्तिः॥ तत्र नोदनजनितकर्मणा वेगो जन्यते॥ स कर्मजः पतनुवेगवतावयवेन [illegible] वेगो जन्यते स वेगजो वेगः॥ स्थितिस्थापकस्तु जलत
पृथ्वीमात्रवृत्तिः [illegible] स्थितिस्थापकजन्यः॥ सुचाकृष्टशिखादौ [illegible] कारणं॥ भावनाख्यसंस्कारस्तु [illegible]॥
उपेक्षात्मकज्ञानजन्यश्च॥ न च स्मरणप्रयोज्योपेक्षात्मज्ञानं [illegible] नहेतुत्वमस्तु संस्कारप्रतिनिधानत्वेनेति वाच्यं॥ उपेक्षात्मकज्ञानजन्यानां

ले रं

तद्य।

स्य क मत् यी५ सनुरोधाय

चेत्तस्यैव कल्पनात्॥ न च प्रथमाध्यवसेयकीर्तनेन तज्जन्यापूर्वनाशात् द्वितीयाद्यध्यवसेयादिभ्यः फलं न स्यादिति वाच्यं॥ सामानाधिकरण्यसंबंधेन कीर्तनविष
यीकृतपापगतस्यापूर्वत्वेनापूर्वत्वेन प्रतिबध्यप्रतिबंधकभावात्॥ न च द्वितीयपापादिकीर्तनेन फलं न स्यात् [illegible] कीर्तनस्य॥ किंचिकर
त्वादिति वाच्यं तत्र प्रथमपापगतस्य [illegible] फलं कल्पनात्॥ प्रथमाध्यवसेयजन्यापूर्वस्य कीर्तनीये द्वितीयाध्य
वसेयादिव्यक्तेः सामानाधिकरण्यसंबंधेनैव तत्र पापद्वितीयाध्यवसेयादिभिरदृष्टजननात्॥ द्वितीयाध्यवसेयादिकीर्तनेनापि कीर्तनविषयीजातद्विती
याध्यवसेयादिव्यक्तेः सामानाधिकरण्यसंबंधेनोत्तेजकत्वात्॥ तत्रादृष्टप्राप्तिः कीर्तनेन तु तद [illegible] दृष्टनाशः [illegible] कीर्तनादिरूपदृष्टनाशात्॥ अथ
दृष्टनाशेन धर्माधर्मौ कुत्र [illegible] धर्माधर्मादिजन्यः [illegible] जनकं संस्कारविशेषोपपत्तिरिति नदारर्थ
मेयत्व॥ न च द्वारस्यापि [illegible]॥ [illegible] कर्त्ता कारणं न त्वस्य [illegible] कीर्तनेन कर्मनाशात् [illegible] जन्यस्य द्वारत्वेन चद्वारस्यैवस्व
प द्वारनाशात्॥ [illegible] द्वारकल्पने तु कीर्तनादिना धर्मनाशात् स्वप [illegible] कीर्तनादिना [illegible] धर्मनाशात्॥ [illegible] तनस्यात्॥
[illegible] कर्मजः॥ [illegible] जनकश्च॥ [illegible] नाशपः॥ [illegible] ब्रह्मादिनाश्चैव॥ [illegible] कर्मणा [illegible] नाशकः स्युप
भोगादि [illegible] धर्माधर्मयोरनेना [illegible] धर्माधर्मौ [illegible]॥ ननु धर्माधर्मयोः [illegible] भोगनाश्यत्वं प्रारब्धेतर कर्मणा [illegible] कर्म
[illegible] प्रारब्धं तु [illegible] कर्म [illegible] नाशपः॥ [illegible] कर्मकल्पकोटिशतैरपि॥ [illegible] सर्वकर्मणा [illegible]
[illegible]॥ प्रारब्धेतरकर्मणां तु ज्ञानादिना नाशः॥ [illegible] व्यापारेण
[illegible]॥ [illegible] तत्र वर्णात्मकः [illegible] व्यापाराणां
[illegible] द्विविधः वर्णात्मको ध्वन्यात्मकश्च॥ [illegible] समुत्प
[illegible]॥ [illegible] वीचितरंगन्यायेन [illegible] कदंबमुकुलन्यायेन वा [illegible] पर्वके त्रेण
[illegible] शब्दः॥ वीचितरंगन्यायेन कदंबमुकुलन्यायेन [illegible] शब्दो [illegible] न्यप
[illegible] शब्दः [illegible] बाधको
[illegible]॥ कदंबगोलकन्यायस्तु [illegible] प्रतीतेः॥ न चोपलब्धि [illegible] प्रतीति
[illegible] शब्दः॥ [illegible] कार [illegible] नोद्भावना॥ न च [illegible] कार [illegible]

प भोगादि त्वं

दु०पुत्र०५

तानेपरसंस्काराणां प्रतिप्रसंगात्॥ अत्र सम न्यतेन पेक्षात्मक ज्ञानात् संस्कारानुपपत्ता स्मरणानाबसे न वेस्मृति जनकता पानुपेक्षान्यत्वेन
वेश्यशति। प्रत्यभिज्ञा प्रति स्मरणस्य हेतु त्वेन संस्कारस्येति अनुद्बुद्ध संस्कारा प्रत्यभिज्ञानुदयाद्बुद्ध संस्कारत्वेन हेतुताया गौरवात्॥
संस्कार प्रति स्मरण त्वेन कार्य त्वेन हेतु त्वेन कल्प्या न लेन स्मरणादपि स्मरणापत्तेरिति केचित्॥ तन्न स्मरणादपि स्मरणस्य
[illegible] चस्यान्ति संस्मृतपुर: [illegible] सत्वेन [illegible] कार्य संस्कार विशेषित [illegible]
र कार्येपि: संस्कार [illegible] संस्कार स्य स्मृति कार्य त्वात् स्मरणादपि स्मरण संभवेन आपत्ते च पुन: संस्कार इति स्मरणाद [illegible] संस्का
र स्य [illegible] स्मरणासिति॥ अत्र [illegible] कार्य: [illegible] पत्यकारकपाद्वशेष्यकानुभव संस्कार [illegible] कारकेत
द्विशेष्यक: संस्कार [illegible] कारकेताद्दशेष्यकात्स्मृतिरिति समान प्रकारकत्वेन [illegible] संस्कारयो: संस्कार स्मृत्यो श्च कार्यकारण भा
[illegible] संस्कार स्य समाना कार [illegible] संस्कार [illegible] स्मरणात्वर्थ
नाशरति॥ अत्र घटत्व प्रकारक घट विशेष्यकानुभवात् घटत्व प्रकारक घट विशेष्यक संस्कार: तस्य घटत्व प्रकारक घट विशेष्यक
[illegible] संस्कार स्य फल [illegible] संस्कार [illegible] कार्य के न घटानुभवेन घ [illegible] एक एव घटत्व
[illegible] संस्कारा [illegible]॥ घटत्व प्रकारक घट विशेष्यक संस्कारत्वेन घटत्व प्रका
र क घट विशेष्यक संस्कारत्वेन [illegible] घट संस्कार [illegible] घटत्व प्रकारक घट विशेष्यक संस्कार [illegible] आपत्त इति
मुक्तघटे अतः संस्कार कल्पने गौरवात्॥ अत्र [illegible] प्रथमा [illegible]
त्॥ [illegible] स्यात्॥ प्रथमा [illegible] प्रथमा
[illegible]
[illegible] तत: [illegible]
[illegible]॥ [illegible] फलबलेन

मा

सकर्त्रकेण

न

॥ रेखा वाचिका॥ तस्या [illegible] प्रत्यक्ष [illegible] कल्पने गौरवात्॥ तदेवेदमोपक्षमपानुकृतिरिति [illegible] प्रतीत्वेन
॥ [illegible] इति॥ एवं च [illegible] वेदपौरुषेयत्व सिद्धं॥ तथा च वेदः पौरुषेयो वाक्यत्वात् [illegible] इति॥ [illegible]
॥ [illegible]॥ [illegible]
॥ [illegible] प्रमाणमिति वाच्यं॥ [illegible] वेदा [illegible]
॥ [illegible] सिद्धौ प्रमाणमिति॥ एवं [illegible]
॥ [illegible]
म ॥ [illegible]
॥ [illegible] कार्यत्वात्॥ घटवत्॥ [illegible] कारण [illegible]
॥ [illegible] इत्यादौ [illegible]
औ ॥ [illegible] सिद्धौ प्रमाणमिति॥ [illegible]॥ इति श्रीमन्न्यायसिद्धान्त [illegible] सिद्धान्त
॥ [illegible] सिद्धान्तसंग्रह॥ [illegible]॥ ॥ इति श्री [illegible] सिद्धान्त
॥ [illegible] समाप्त:॥ ॥ ॥ शुभमस्तु॥ ॥ श्री महालक्ष्मै नम:॥ ॥ ॥ संवत् १८५८॥